M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 262

Title: Asta Sadhya Nairupana

262

अनु० चिन्ता० दीधितिटीका हेतुसाध्यनिरूपण	Title
गदाधरी	Author
	Editor
	Year, Vols.
	Publisher
262	Remarks

गा० दी०
१

॥श्रीगणेशाय नमः॥ ॥श्रीसरस्वत्यै नमः॥ हेत्वाभासनिरूपणे प्रसंगस्यापि संगतित्वं संभवति व्याप्तिपक्षधर्मता
विशिष्टहेतुनिरूपणे व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मारणादवश्यं तदप्रदर्शकेनेन मूलस्य न्यूनतां परिजि
हीर्षुः प्रसंगस्यापि तन्निरूपणप्रयोजकत्वमाह ॥ एतावतेति । सपरिकरे व्याप्तिपक्षधर्मते निरूपिते तत्तदुक्तप्रायेण दुष्टहे
तोः स्मृतत्वस्य प्रसंगनिर्वाहकस्य लाभाय तत्प्रसंगादिति । सपरिकरहेतुनिरूपितप्रसंगसंगतेरित्यर्थः । तत्र ज्ञानजन
न्यान्निग्रहाधीनत्वं पंचम्यर्थः । अन्वयव्याप्त्यादिनिरूपणमित्यनेन तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूलं नेदपीह
त्वाभासनिष्ठतत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकतया शिष्यस्य हेतुप्रयोगेणैव निरूपणाघटकज्ञानप्रयोजनप्रे
क्षं परतेत्यापितमात्रपरत्वे संगत्यप्रदर्शनेन न्यूनतास्यादिति तस्याहककार्यकारित्वरूपसंगतिप्रदर्शनपरत्वमपि
५ संभवतीति स्फुटीकर्तुमाह ॥ तत्त्वनिर्णयादिति । आदिपदाद्विजयपरिग्रहः । तत्कार्यकारित्वात् ॥ सपरिकरहेतुप्रयोज राम०
कार्यप्रयोजकत्वात्प्रयोजकत्वं च जनकजनकतावच्छेदकसाधारणं तत्त्वविषयकज्ञानकार्यप्रतिस्वस्य तत्त्वमक्षे १

तमेवं तत्त्वनिर्णयः प्रमितकोटिनिश्चयः तत्र व्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधक
स्य हेत्वाभासत्वज्ञानमप्युपयुज्यते प्रतिबंधकीभूतविरोधिकोटिव्याप्यवत्ताज्ञाने ऽप्रामाण्यग्राहकत्वादित्युभयोस्त
त्त्वनिर्णयप्रयोजकत्वं अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञानप्रमात्वनिश्चयः तत्रानुमापकहेतौ व्याप्त्यादिविशिष्टत्वरू
पसद्धेतुत्वज्ञानमिव विपरीतसाधकहेतोर्दुष्टत्वज्ञानमप्युपयुज्यते प्रकृतसाध्ये प्रामाण्यग्राहकविपरीतसाधक
हेतुदुष्टत्वग्रहविघटकत्वात् विजयप्रयोजकत्वं च हेत्वाभासस्य तज्ज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादि
विशिष्टहेतोः सज्ज्ञानाधीनसन्न्यायप्रयोगद्वारा वा बोध्यं मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषे घटेऽतिव्याप्तिः यथा
र्थज्ञाननिष्ठानुमितिप्रतिबंधकतावच्छेदकविषयताश्रयत्वपर्यंतस्य समूहालंबनज्ञानविषयताश्रये उदासीनपदा
र्थे वारणाय प्रथमलक्षणे विवक्षणीयतया बाधादिज्ञानप्रतिबंधकतायाः प्रयोजकहेतुविषयतायाश्चानवच्छेदकत्वा
त्तत्र तु हेतावव्याप्तिः स्वविषयकत्वेनेत्यादिलक्षणे च तृतीयायाश्चावच्छेदकत्वार्थकतया सत्तर्कांतर्भावेऽपि तत्राह

अथवानुमितपमानव्यभिचारादेर्भिन्नकालेऽप्यनुमितिकारणीभूतज्ञानप्रतिबंधकत्वादेतन्मते व्यभिचारादेर्दोषत्वं संभवतीति भावः हे०सा०नि०

संकरेणादिभाग व्या ४

ग०क्षु० २ यथाश्रुतमिति इदं चैतल्लक्षणत्रयं न तु हेत्वाभासं तत्रेति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वात् दुष्टहेतुनिरूपणा
स्यैव प्रतिज्ञातत्वात्तल्लक्षणमप्याकांक्षितं अतस्तदनुक्तौ न्यूनतापत्तेर्नाम्नान्यथा विधव्युत्पत्त्या हेत्वाभासपदस्य हेतु
दोषपरत्वसंभवेपीति चेत्यादिना दुष्टहेतूनामेव विभजनात् दुष्टहेतुनिरूपणस्यापि प्रतिज्ञातत्वेपि तदसंगतेः एवं दुष्टहे
तुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां विभागानर्हतया दुष्टहेतुत्वेन व्याघाताशंकायामनंतत्वादुपेक्षेय संकरेपीत्यादिग्रं
थस्य उपाध्यसंकरेण विभागोपपादनपरस्यासंगतिरित्यत आह तद्वत्त्वं चेति। तादृशदोषवत्त्वं चेत्यर्थः दुष्टहेतूनां ल
क्षणमित्यनुषज्यते स्फुटमिति शेषः तथा च दुष्टहेतुनिरूपणस्याप्रकृतत्वेपि दोषलक्षणोक्तौ दुष्टहेतुलक्षणस्य
स्फुटतया लाभेन नोक्तानुपपत्तिरिति भावः तदभिप्रायेणैवेति॥ दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः अनुमितिपदस्य
अनुमितिसामान्यपरत्वे तिप्रसंगात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकं तथा च व्यभिचारादावव्याप्तिर्वह्नि राम०
धूमव्यभिचारीत्यादिज्ञानाभावस्य पर्वतो धूमवानित्याद्यनुमितिजनकत्वाल्लक्षणायात्तस्य तादृशानुमितिकारणाज्ञा २

नमात्रपरत्वे बाधादावव्याप्तिर्बाधादिज्ञानस्य परामर्शप्रतिबंधकत्वात् अत आह अनुमितिपदमत्र तत्त्वार्थलक्षणायां तदुभयं प
रत्यापाद्यबाह्यचेत्तत्रेति तादृशलक्षणवाक्यस्थत्यर्थः। लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतं रूपमाह अनुमितिनि
ष्ठकार्यतानिरूपकसंबंधित्वेनेति॥ अनुमितिपदस्य प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकावच्छिन्नप्र
कारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्शयिष्यति अतो न तस्य मानाभावातिप्रसंगः निरूपक
त्वं च यद्यपि प्रतियोगित्वं तद्वा कार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसंग्रहः अतः संबंधिपदं संबंधिरूपसाधारणस्य
तत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकनिरूपकत्वस्य लाभाय अत्र पर्वतो वह्निमान् ह्रद इत्यनयोरित्यादिसमू
हालंबनानुमित्यादिविरोधिह्रदनिष्ठवह्न्यभावादिरूपबाधादेः पर्वतादौ धूमादिना वह्न्यादिसाधने दोषताप्रसंगः प्रकृता
नि नुमितित्वं कार्यतानिरूपकसंबंधिग्रहत्वस्य कस्यापि प्रतिबध्यतावच्छेदकतया तदवच्छिन्ननिरूपितप्रतिबंधकतानि
वेशासंभवात् तथाविधग्रहत्वव्यापकप्रतिबध्यतानिवेशे च अनुमित्यविरोधिनि व्यभिचारदोषपरामर्शविरोधिनि वा

ग० ४० धादौ चाव्याप्तिः उभयविरोधिविरहस्याप्रसिद्ध्यादावेतादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्त्वादतः कल्पांतरमाह सा
३ ध्यव्याप्येति प्रकृतपक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नतद्व्याप्तिविशिष्टप्रकृतहेतुतावच्छेद त
कावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः । एवं चैतादृशसमूहालंबनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञा
नादिप्रतिबध्यत्वात्तन्मते व्यभिचाराद्यसंग्रहदूषितमसमूहालंबनानुमितिप्रतिबंधकताभावादर्थांतरप्रसंगस्य वारणाय सामान्य
पदं तेन च तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताशालियथार्थज्ञानविषयत्वं पर्यवसितोऽर्थः साध्य
तावच्छेदकावच्छिन्नादिप्रकारकानुमितिसामान्यांतर्गतायां पर्वतो वह्निमान्च वह्निव्याप्यधूमवांश्चेत्याद्यनुमितौ हृदो न व
ह्निमानित्यादिनिश्चयस्याप्रतिबंधकत्वान्नातिव्याप्तिरिति भावः । बाधसत्प्रतिपक्षत्वरूपासिद्ध्यन्यतमासिद्धिष्वव्याप्तिवारणा
यप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशः द्रव्यत्वादिना हृदादिविशेष्यकानुमितौ तथाविधनिश्चयस्या राम०
प्रतिबंधकत्वात्तद्दोषतादवस्थ्यमतः पक्षतावच्छेदकावच्छिन्नत्वोपादानमवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं तेनातेन स्ती ३

पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति तत्त्वाद्यभावरूपबाधस्य कांचनमयः पर्वतो वह्निमानित्यादौ पक्षाप्रसिद्धेः शु न
द्धपर्वतत्वावच्छिन्नपक्षकानुमित्यविरोधित्वेऽपि नासंग्रहः ॥ एवमग्रेऽपि बोध्यं ॥ साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानि
वेशेऽपरामर्शविरोधितया बाधसत्प्रतिपक्षयोरव्याप्तिः । तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेऽपि तद्दोषताद
वस्थ्यं वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमज्ञानकतेजस्त्वीयवह्निव्याप्यधूमवान् हृद इत्याद्यनुमित्यप्रतिबंधकत्वात्साध्या तावच्छेदका
प्रसिद्ध्याऽव्याप्तिवारणप्रयोजनकत्वं तदुपादानस्येति तु न सत् वह्निर्न कांचनमय इत्यादिनिर्णयस्य शुद्धवह्नित्वादिना वह्न्या
ध्यनुमित्यविरोधित्वेऽपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नांतर्भावसत्त्वात्तस्य कांचनमयवह्निव्याप्यधूमवानयं पर्व
त इत्यनुमितिविरोधितया तत्र लक्षणगमनात् द्वितीयदलप्रवेशाद्व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः
तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः वह्निर्धूमव्यभिचारीत्या
दिज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तिभानसंभवात्तद्दोषतादवस्थ्यमतो व्याप्तेः साध्यतावच्छेदकावच्छि

ग०५० त्रीयत्वनिवेशः अन्वयव्याप्तिव्यतिरेकव्याप्तीविशिष्योपादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेश्यं एकतरमात्र
४ व्याप्युपादाने साधारण्यानुपसंहारित्वयोरेकतरासंग्रहप्रसंगादित्यग्रे व्यक्तीभविष्यति तादृशव्याप्तिद्वयप्रकारता नि
त्र रूपितहेतुप्रकारतायास्तत्साध्यकतद्धेतुकानुमितिनिष्ठकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेशस्तु न संभवति सा
ध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ताज्ञानोत्पत्त्या साधारण्यादेस्तादृशप्रकारता
ज्ञानानुमितिसमानपरिरोधित्वाभावात्॥ तादृशव्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदकावच्छि
न्नविषयित्वमात्रस्य वा निवेशे सद्रूपासिद्धावव्याप्तिरतः पक्षांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रका
रकत्वनिवेशः पक्षांशे व्याप्तिविशिष्टप्रकारकत्वमात्रनिवेशेऽपि तद्दोषतादवस्थ्यं धूमाभाववान् ह्रदः इत्यादिज्ञानस्य
द्रव्यत्वादिना हेतुमत्ताज्ञानाविरोधित्वात् साधारण्यादावव्याप्तिश्चैवं द्रव्यत्वावच्छिन्ने धूमाभाववद्वृत्तित्वादिग्रहस्य धू रा.म०
मादिव्याप्तिविशिष्टतद्वत्ताकित्वावच्छिन्नप्रकारकज्ञानाविरोधित्वात् इतो हेतुतावच्छेदकावच्छिन्नत्वनिवेशः। पक्षां ४

शे साध्यादिप्रकारकस्य संस्कारादेराहार्यज्ञानस्य च बोधादिज्ञानप्रतिबध्यतादसंभवदुत्पत्तस्तादृशानुमितित्वव्यापकं प्रवेशः साध्य त्र
व्याप्यहेतुधर्मितावच्छेदककसाध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्याकारकतया तादृशाकारलिखनस्वर
सात् तादृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यतानि
रूपितप्रतिबंधकत्वस्य लक्षणघटकत्वोपगमे पर्वतत्वावच्छेदेन वह्निः साध्यत्वे तत्तत्सामानाधिकरण्येन साध्याभावादेरदोष
त्वप्रसंगः सामानाधिकरण्यमात्रावगाहिवाधादिज्ञानस्य प्रकृतपर्वतत्वावच्छेदेन वह्न्यादिज्ञानं प्रत्यप्रतिबंधकतया धूम
विशिष्टपर्वतत्वावच्छिन्नधर्मिकवह्न्यादिज्ञानाप्रतिबंधकत्वादिति तदुपेक्षितं॥ न च विशेष्यतावच्छेदककोटौ धूमादेरधिक
स्याभानेऽपि शुद्धपर्वतत्वावच्छिन्नसंयोगादेर्यत्र संसर्गतानंत्र पर्वतत्वसामानाधिकरण्येन वह्न्यभावादिज्ञानस्य प्रतिबंधकत्व
मावश्यकं तादृशानुमितेरपि शुद्धपर्वतत्वावच्छेदेन वह्न्यावगाहित्वादिति वाच्यं॥ धर्मितावच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मि
तावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमेव संसर्गोऽवभासते न तु तदेकदेशावच्छिन्नत्वमपि तद्धर्मावच्छिन्नविशेष्यताति

ग.ध. रूपितत्व दिकदेशव्यापकत्वावच्छिन्नसंसर्गेतयाप्रश्रप्रकारिभिकत्वात्याप्यव्ययलिंगोपधानमतेहेतोः सर्वत्रैवधर्मितावच्छेदकतयाभा
५ नात्तादृशसंसर्गेनास्युपगमस्त्रावश्यकः। अन्यथासुद्धपर्वतत्वाद्यवच्छेदेनहेतुमत्ताज्ञानस्यालेपि हेतुविशिष्टपर्वतत्वावच्छिन्न
संयोगादिसंसर्गकानुमितेरेवास्तुपगमेपर्वतत्वादिसामानाधिकरण्यमात्रावगाहिबाधादिग्रहकालेपितथाविधसाध्यनिश्चय
वतोऽनुमित्यापत्तेः। नहिसामानाधिकरण्येनबाधनिश्चयोस्तुत्योरनुमितिंकश्चिदुपैति तादृशबाधादिग्रहस्यकाचिदप्यनुमिति
प्रतिबंधकत्वासंभवात्तेषांहेत्वभसत्ताविलयापत्तिश्चेतिचेदेवमपिलिंगानुपधानमतेतादृशविषयतायामानाभावएव। प्र
कृतग्रंथस्यतल्लिंगोपधानमताभिप्रायकत्वात्तेनानुमितेः सर्वत्रैवतथाकारतयाप्रतादृशाकारत्वस्यव्यावर्त्तकतयानुमि
तिपदस्यतादृशाकारानुमितिपरत्वमदर्शनासंगतेः केचित्तुलिंगानुपधानमतेऽनुमितिपदस्यतदुभयपरत्वंमास्थायव्याप्तु
तापरत्वानिर्वाह्यलिंगोपधानमतमेवस्वयंतेसाध्यव्याप्येत्यादिनातादृशाकारकानुमितिपरंस्वअनुमितेरित्याकारकतामतताभिप्रेत्यक् रा.म.०
मितियाच्छस्तैरेतादृशाव्याप्त्याप्रयोजनंस्फुरयतीतिनेति। एकत्रैववह्निव्याप्येकधर्मावच्छिन्नेव्यभिचारादीत्यादिनातत्कृत्यासिद्धि ५

परिग्रहः अन्यस्यपरामर्शोत्तरंवह्निर्त्वादिरूपापरधर्मावच्छिन्नेव्याप्तिपक्षधर्मतावगाहिज्ञानात्। व्यभिचारादिर्त्वादि हेतोर
स्य नुमित्यज्ञानकेत्वेपीतिनसंबंधः। यत्रतद्रूपावच्छिन्नेव्यभिचारज्ञानेनोत्पत्तिद्वितीयक्षणेकथंचित्तद्रूपावच्छिन्नलिंगकपरा
मर्शस्तत्रैकक्षणाविलंबेनानुमित्युपगमेव्यभिचारासंभवात्तत्रव्यभिचारोदर्शितः। ननुतद्धर्मावच्छिन्नलिंगकानु
मितौतद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानाभावस्यहेतुत्वोपगमात्तोक्तव्यभिचारः तद्धर्मावच्छिन्नलिंगकत्वंचाव्यवहि
त तोत्तरत्वसंबंधेनतद्रूपावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वंतादृशसंबंधेनव्यभिचारज्ञानविशिष्टंयत्तदन्यत्वमेववा
जन्यतावच्छेदकंवाच्यं तेनधूमव्याप्यवह्निमानयमित्याकारकस्याद्यपरामर्शोत्पत्तिद्वितीयक्षणोपन्नलौकिकसंनिकर्ष
जन्येधूमव्यभिचारिवह्निर्धूमव्याप्योंधूमवानयमित्याकारकसमूहालंबनग्रहस्तज्जन्यानुमितेरुक्तसंबंधेनवह्निमात्रावच्छि
न्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वेपिक्षतिरित्यतव्याहृत्याव्याप्यादीतिकृत्स्नकारणताकव्याप्त्यादिज्ञानसत्वेव्यभिचारज्ञाना
द्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वादितिभावः व्याप्तिज्ञानेव्यभिचारज्ञानाभावेनान्यथासिद्धत्वशंकाप्रा

ग०म०
६

गेवतिरस्कृतानुस्तेति ।। नव्यभिचारादावव्याप्तिः यत्र सद्धेतुविशेषे तादृशानुमितेरप्रसिद्धिस्तत्र तद्दोषे व्याप्तेर्लक्षणाभावात्तथे
तादृशपक्षास्तु तथा स्थापामनभिमतस्ते नायं वदंतीति पर्वतो वह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषये प्रतिबं
धकीभूतव्यभिचारकतया यथाश्रुते पयथार्थपदं सार्थकमिति । पर्वतो निर्वह्निरिति ज्ञानत्र इतिपदस्याश्रितयस्थले प्रत्येकं संबंधात् अत्र
मन्नयत्लीभः प्रत्येकभ्रमभावादपि वातिप्रसंगासंभवात् ।। तादृशसमूहालंबनभ्रमपर्यंतानुधावनं वैफल्यापत्तेरसंगते
रिति ध्येयं प्रथमभ्रमो ऽनुमितिप्रतिबंधकः अन्यो च तज्जनकज्ञाने तयोस्तयोरपि प्रथमे ऽन्यत्राप्रसिद्धस्य साध्याभावव
द्वृत्तित्वस्य धूमांशे भ्रमत्वं अत्रे प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिध्यानन्त द्रुमत्वं किंतु अभावांशे अनुयोगिताविशे
षसंबंधेन साध्यस्य भ्रमत्वमिति तादृशविशेषणाद्रूपशिष्यव्युत्पादनायानैकभ्रमप्रदर्शनं ।। इदंत्ववधेयं व्यभिचारेय
त्वं प्रमेयत्वस्य व्यभिचारित्वज्ञानस्वरूपसंबंधावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रमेयत्वस्य भ्रमो वा राम०
च्यः प्रतियोगितांशे साध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोः साध्याभाववद्वृत्तित्वरूपव्याप्तिघटक ६

तथा च तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात् एवं च मेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिता
कत्वस्याप्रसिद्धावपि स्वरूपसंबंधावच्छिन्नतादृशप्रतियोगिताकत्वाप्रसिध्या तादृशभ्रमानुपपत्तिः प्रतियोगित्वांशे सं
बंधविशेषावच्छिन्नत्वस्य भ्रमदृत्यपि न युक्तं तस्य संबंधघटकतया तत्प्रकारकत्वघटितभ्रमत्वानुपपत्तेः न च तेन
रूपेण प्रतियोगिताप्रकारक एवात्र भ्रमो विवक्षितो न तु तदवच्छिन्नप्रतियोगिताकत्वसंसर्गक इति वाच्यं लाघवा
त्प्रतियोगितासंसर्गकव्याप्तिज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्याकिंचित्करत्वात् ।। अत्राहुः
स्वावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकवत्त्वमेवाभावस्य साध्यभा
ववद्वृत्तित्वरूपव्याप्तिघटकं लाघवात् एवं च तादृशसंबंधेनाभावांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञान
स्य व्याप्तिग्रहविरोधितया घटत्वादेः प्रसिद्धेन तादृशसंबंधेन मेयत्वत्वादेरेवाभावांशे भ्रमात्मकत्वात् तथा विशेष्यद्वितीन
किंचिदनुपपन्नं प्रथमे साध्याभाववद्वृत्तित्वज्ञानविरोधिहेतौ साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य भ्रमः ।। द्वितीये च
परेतु
वच्छिन्नवृत्ति २

ग.ध.
७

तदप्रसिद्ध्या व्यापकसामानाधिकरण्यघटितविरोधी साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्याभि
मोऽभिमतः समानप्रकारकज्ञानस्यैव विरोधित्वात् द्विविधव्यभिचारसंग्रहाय द्विविधव्यभिचारविषयकसमूहालम्बनस्यैकत्र
क्षरो निवेशनीयत्वात् न च हेतुस्साध्यव्यभिचारीत्यतः साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व
स्य दुर्लभत्वात् तदवगाहि ज्ञानस्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्याकारकत्वानोपपद्यत इति वाच्यं। यतो ऽभावत्ववद्वृत्तित्वं
समानाधिकरणाभावप्रतियोगितावच्छेदकत्वं चद्वयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः तत्र प्रथमव्यभि
चारतात्पर्यकस्थले व्यभिचारपदार्थैकदेशे भावे ऽनुयोगितारूपपदार्थस्य तत्र प्रकृतसाध्यतावच्छेदकवद्भिन्नावच्छिन्नत्वनि
रूपितत्वसंबन्धेन प्रकृतार्थस्यान्वयः मत्वर्थीयार्थः स्वरूपसंबन्धवत्त्वं तस्यैवाभेदसंबन्धेन प्रथमान्तार्थे ऽन्वयः। द्वितीयतत्पदार्थ
परवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वितप्रथमार्थस्य निरूपितत्वस्यान्वयः षष्ठीप्रकृते स्वाधर्मपरतया रामं॰
षष्ठ्यन्तार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयबलल्लभ्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वे तस्य तद्धि ७

तार्थसंबन्धिनो ऽनेकदेशे घटकत्वरूपसंबन्धे संबन्धिनस्त्वाभेदेन प्रथमान्तार्थे ऽन्वयः। एवं चोक्तवाक्यात्तत्र साध्यतावच्छेदके
हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापि लाभात् तत्र तदवगाहि भ्रमस्य दर्शिताकारतासंभवः। स्यापि च द्वेति
भ्रमादिति पंचम्यर्थः प्रयुक्तत्वं तस्य प्रतिबंधपदार्थे ऽनुत्पादे ऽन्वयः। यथार्थेतीति। यथार्थपदस्य दाने ततस्याधिकरणप्रका
रावच्छिन्नाया या विषयता तदनिरूपकत्वस्य सवैधर्म्याप्रमात्वस्य विवक्षितत्वेन दर्शितभ्रमाणां किंचिदंशे प्रमात्वे ऽपि न तन्नाद
प्रदोष इति भावः। अत्र यथार्थपदेन सद्धेतुस्थले ऽनुमितिविरोधिभ्रमविषयसाध्याभावादावतिप्रसंगवारणे ऽपि ऽसद्
हेतुस्थलेत्ताहृशभ्रमाविषयदोषघटकसाध्यादेः प्रत्येकं दोषत्वापत्तिर्दुर्वारैवेति तदर्थप्रकारांतरानुसरणे चेत् तत्रैव पू
र्वे दोषस्यापि वारणसंभवे यथार्थपदं व्यर्थमिति दोषस्य दुरुद्धरतया तत्स्यैव यथार्थपदाघटितलक्षणांतरानुसरणावीज
त्वमाह्यतन्न्विति। एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्यैष्टत्वादाह। प्रत्येकमिति। प्रत्येकपदार्थपर्याप्तसा
य ध्यतावच्छेदकावच्छिन्नस्येत्यर्थः। हेत्वाभासतापत्तिः। हेत्वाभासपदार्थतापत्तिः यद्रूपावच्छिन्नज्ञानस्यानुमितिविरोधित्वं तद्रू

ग॰ष॰ पावच्छिन्नेहेतावाभासत्वव्यवहारस्य तद्रूपावच्छिन्नमात्रज्ञानेर्द्विहेतौ दुष्टत्वव्यवहारस्य चानुदयेनानिष्टापत्तिर्न संभवतीति भावः। यथाहृ
८ शविशिष्टविषयकत्वं ताहृश्यानुमितिविरोधितानतिरिक्तवृत्तित्वमिति विवक्षणान्न साध्याद्यवतिव्याप्तिरित्याशयेनाशंकते स्वे
यतिविशिष्टविषयकं साध्याभाववद्वृत्तित्वविशिष्टसाधनादिविषयकमेवं तद्घटकं च ताहृशविशिष्टघटकप्रत्येकपदार्थविषयकं
चेद्विशिष्टनिरूपितं तथा च प्रत्येकपदार्थविषयकत्वस्य प्रतिबंधकतानतिरिक्तवृत्तित्वान्नातिव्याप्तिरिति भावः। व्यर्थमिति यथा
र्थपदादाने सिद्धहेतुस्थलेऽतिव्याप्तिवारणासंभवात्। ननु तत्र भ्रमविषयप्रत्येकपदार्थस्योपकारीनावारयोपि तद्विषयविशि
ष्टेऽतिव्याप्तिरतस्ताहृग्भ्रमविषयेति। स्वप्रसिद्धत्वादिति। तच्चायक्तातिव्याप्तिरिति भावः। केचित्वितिं नन्वस्य दुष्टहेतुलक्षणत्वे
दोषेष्वतिव्याप्तिस्तेषामप्यनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदत्वावच्छिन्नपक्षकवह्न्यादिसाध्यकस्थलेव नवभाव
वद्ध्रदादिरूपदोषाणामपि दुष्टहेतुत्वमिष्टमेवेति वाच्यं। तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थले रा॰म॰
तेन रूपेणादुष्टस्थलक्षणांशे दितद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रेण तदा ह्रदत्वावच्छिन्नप ८

क्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकप्रमाविषयवन्ह्यभाववत् ह्रदादीनां धूमत्वादिनादुष्टत्वा
भावात् स्वतिव्याप्तिरित्याशयं केऽपि रिजिह्वीर्षुस्ताहृशाभावप्रतियोगिनां यथार्थज्ञानमिति षष्ठीसमासमाश्रित्य ताहृशाभावप्रति
योगिप्रकारकयथार्थज्ञानविषयत्वमेवं यथार्थव्याख्यायात्ति तच्च ज्ञाप्यमानदोषस्य प्रतिबंधकतामत एव संगच्छते स्वतत्सम्मत
मेवावलंब्याह तत्रेति। तेषु लक्षणेषु मध्ये इत्यर्थः। तृतीयलक्षणस्य सर्वमतस्वज्ञाप्यमानदोषप्रतिबंधकतामताभिप्राय
कत्वया दृष्टान्तोपन्यासः। तदर्थस्येति प्रतियोग्यंतेन व्यभिचारादिदोषाणामादायलक्षणासंगमनीयमिति दर्शयितुं व्यभिचार
दयइति। ननु तेन रूपेणालक्षणाघटकत्वमित्यवधेयं। चयथार्थपदादनिदुष्टत्वभ्रममादाय पर्वतत्वावच्छिन्ने वन्हित्वाव
च्छिन्नसाधने धूमत्वावच्छिन्ने दुष्टइत्यादेः सद्धेतौ दुष्टव्यवहारस्यनापत्तिः। तत्र तत्तत्साध्यपक्षहेतुकानुमितिप्रतिबंधकरूप
दोषप्रकारकज्ञानविषयत्वस्यैवाप्रत्येतव्यत्वात् ताहृशानुमितिप्रतिबंधकबाधव्यभिचारादेस्वाप्रसिद्धत्वाद्ध्रदादेर्वन्ह्यादिस
धनमादायपर्वतेवह्नौदुष्टव्यवहारइष्टस्तथापि धूमसाध्यकवन्हित्वेनायं दुष्टइत्यादौ वन्हित्वावच्छिन्नहेतुकधूमत्वावच्छिन्ना

ग॰प॰
१६

नुमितिप्रतिबंधकदोषप्रकारकज्ञानविषयत्वस्याप्रत्ययात् तादृशानुमितिप्रतिबंधकधूमाभाववद्वृत्तित्वविशिष्टवन्ह्यादिरू
पप्रसिद्धदोषप्रकारताशालिभ्रमप्रमादायरासमाद्दितात्पर्यकत्वापि तथाव्यवहारः स्यात् न च तत्र विशेष्यतेतृतीयान्तार्थवन्हि
त्ववैशिष्ट्याभावान्नासमभेतद्धावेन नायमतिप्रसंग इति वाच्यं तथासति दोषपदार्थघटकानुमितौ वन्हित्वावच्छिन्नहेतुकत्वाला
भात् तद्धामानुरोधेन हेतुप्रकारकज्ञानस्य वन्यानुमितिप्रतिबंधकरूपदोषपदार्थघटकहेतौ वन्हित्ववैशिष्ट्यरूपतृतीयान्तार्थ
स्य तत्प्रकारतायां वा वन्हित्वावच्छिन्नत्वार्थकतृतीयान्तलभ्यवन्हित्वावच्छिन्नत्वस्यान्वयस्य योगं तव्यत्वात् न च विशेषणे वन्हित्वादि स्य
धर्मवैशिष्ट्यबोधकसमभिव्याहारस्थले दोषपदार्थकथानौ एव वन्हित्वावच्छिन्नहेतुकानुमितिप्रबंधकोर्थः अन्यथा वास्त्वनुमित्य
र्थकसाधनपदस्यैव वन्हित्वावच्छिन्नहेतुकानुमितिरूपविशेष्यत्वालाभप्रसंगात् तदुपधानात्वर्थे ऽनुमित्यंतभावे साधनपदार्थेन
न्वयप्रसंगात् तथा च विशेष्यस्य तृतीयार्थवैशिष्ट्यान्वयोपगमात् नोक्तातिप्रसंग इति वाच्यं एवमपि वन्हिना धूमसाधने रास राम॰
भीदुष्टत्वाद्यव्यवहारस्य भ्रमप्रमादायातिप्रसंगादिति अथ वेतरभेदानुमापकमेवेदं लक्ष्यं न तथा च पर्वतनिष्ठकधूमसाध्य १६

कवन्हिहेतुकदुष्टत्वस्याप्रसक्तया विद्यानुमितिविरोधिज्ञानविषयव्यभिचारादिभ्रमप्रमादायस्वद्धेतावितरभेदव्यभिचारित्वादिति यथा
र्थपदस्यार्थकं ज्ञानं चात्र स्वज्ञानविषयप्रकृतहेत्ववच्छेदकवत्त्वसंबंधावगाहि ग्राह्यं अन्यथैतेन प्रकृतहेतुभिन्नस्यापि संबंधांतरेण दोष
प्रमाविषयत्वेत्तिनातिप्रसंगः अन्ये तु स्वसंबंधेनैव तद्धत्त्वं वाच्यं अत्र यज्ज्ञायमानपक्षनिष्ठसाध्याभावत्वादिना बाधादिदोषाणां प्र
तिबंधकता न संभवति साध्याभाववत्त्वादिना पदार्थांतरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतया अविरोधित्वेनानुमित्यापत्तेः
किंतु ज्ञानीयपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावत्वावच्छिन्नविषयतावत्त्वेन तादृशविषयतया ज्ञानविशि
ष्टत्वेन वा तत्तद्रूपेण तादृशभ्रमविषयपदार्थांतरसाधारणमेवेति तेषामेव भ्रमदृश्यायां विरोधित्वान्नोक्तापत्तिः एवं च सद्धेतुना
मपि प्रतिबंधकतावच्छेदकनिरुक्तविषयताश्रयवत्त्वाभावादिप्रमाविशेष्यत्वाद् इति व्याप्तिरिति चेन्न यद्रूपावच्छिन्नविषयतासामा
न्यमनुमितिप्रतिबंधकतावच्छेदकं तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयं ह्रदो वन्हिमान् धूमादित्यादौ च तादृश
रूपं ह्रदविशिष्टवन्ह्यभाववत्त्वादिकं ह्रदे वन्हिर्नास्तीत्यादिज्ञाननिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव तद्रूपत्वावच्छिन्नविष

यत्ता निरूपितवह्न्यभाववत्ताद्यवच्छिन्नविषयतात्वेन दोषनिष्ठानुमितिप्रतिबंधकतायामवच्छेदकत्वात् सद्धेतुस्थलीयकेवलवह्न्य
भाववत्त्वादिकं न तथा तदवच्छिन्नविषयतासामान्यांतर्गतधर्म्मविषयकज्ञाननिरूपितत्वादृशविषयतान्नामनुमितिप्रतिबं
धकतानवच्छेदकत्वात् पर्वतविशिष्टवह्न्यभाववत्त्वादि विशिष्टं च नैकं किंचिदुक्तप्रसिद्धमिति नातिप्रसंगः तृतीयमपि लक्षणमन
येन रीत्या परिष्कार्यं । दुष्टहेतुबोध्यं यद्यद्विष्य स्वदुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबंधकतामत्तानाम्रघटोपि तद्रूपावच्छिन्न
पक्षसाध्यहेतुकानुमितिप्रतिबंधकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण
या दुष्टत्वमिति तर्कतामुपगम्य यथेप्पदसार्थक्यमुपपादयितुं शंकते तथापि दुष्टलक्षणासदोषघटितत्वानुरोधेन तत्तन्मतम
वलंब्य षष्ठीसमासस्याश्रितत्वमिति ॥ ननु द्वितीयतृतीयलक्षणयोर्दोषेति षष्ठीसमासाभिप्रायकत्वे चिद्वेतोर्यत्पदेन दोषस्यैवोपादे
यतया तत्समासत्वात्र वृत्तित्वादसंभवः अतस्तत्र मितिपस्यैति प्रथममात्रस्य दुष्टत्वं हेतुलक्षणत्वेनैवोपपत्तौ चरमयोर्दोषलक्षणात्वं राम०
मेवोचितं तत्तन्मितस्य यथाश्रुतार्थकत्वानुरोधात् अत आह आद्यस्यैवेति दृश्यासाख्याया निर्दोषत्वात् प्राहुरित्यंतं १०

कं२

लिंगज्ञानस्येति मूले लिंगांशनिवेशस्य निष्प्रयोजकतया तस्याविवक्षितत्वमाह लिंगमिति । यद्विषयकत्वेनेत्यत्र तृतीयार्थो
ऽवच्छेदकत्वं तदवच्छेदनातिरिक्तवृत्तित्वरूपमिदानीं निवेश्यते तदसंभवः विशिष्टस्यानतिरिक्तत्वात् वह्न्यभावविशिष्टह्रदादि
रूपदोषविषयकत्वस्य ह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमितिप्रतिबंधकतातिरिक्तवृत्तित्वादतः स्वरूपसंबंध
रूपमेव तत्त्वाच्यं तथा च पर्वतो वह्निमानित्याद्यनुमितिप्रतिबंधकभ्रमविषयवह्न्यभावादावतिव्याप्तिस्तद्विषयकत्वस्यापि
प्रतिबंधकतावच्छेदकघटकत्वात् तदसंभवभयेन चावच्छेदकतापर्याप्तिनिवेशे संभवात् तद्विषयकत्वेनेति पदं व्याचष्टे या
दृशविशिष्टविषयकत्वेनेति यादृशविशिष्टविषयकत्वेन यद्रूपावच्छिन्नविषयताकत्वेन एवं च तत्त्वमित्यस्य तद्रूपावच्छिन्नत्वम
र्थः व्याख्याबीजं सूचयति तेनेति यत्प्रकारकत्वेन प्रतिबंधकत्वमित्यक्तौ पक्षविशेषणकभ्रममादाय वह्न्यभावादौ नातिप्रसं
गः पर्वतादावतिप्रसंगसंभवेपि यत्संबंधावच्छिन्नयन्निष्ठप्रकारताकत्वेनानुमितिप्रतिबंधकत्वं तेन संबंधेन तद्वत्त्वस्य दुष्टताव्य
वहारनियामकत्वोपगमे पर्वतविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्वतादिनि

ग.ध. प्रकारताकत्वेन प्रतिबंधकत्वात्तेन संबंधेन पर्वतादिमत्तायाः पर्वतमहानसान्यतरत्वादिरूपसद्धेतोः सत्वेपि प्रसिद्धधूमादिरूप
११ हेतावसत्वात्तत्र दुष्टत्वाव्यवहारापत्तेरयोगात् इति तदनुरोधेन पक्षविशेष्यके तु उक्तभ्रमपदं निश्चयसामान्यपरं तेन सद्धेतुत्वादीना
दिपदस्यात्यसाध्यकस्वपक्षक दुष्टहेतौ अनुमितिप्रतिबंधकप्रमाविषयसाध्याभावादेः असत्वेपि व्यासंगविरहः नातिप्रसं पिप्लबेक्ठ
गइति उक्तव्याख्याने अनतिरिक्तवृत्तित्वमेवावच्छेदकत्वं विवक्षणीयं विशेषणीभूतवन्ह्यभावाद्यविषयके शुद्धह्रदत्वा
दिना वन्ह्यभाववविशिष्टह्रदादिविषयकज्ञाने वन्ह्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्वे
व नोक्तासंभवानवकाशात् तथा च केवलवन्ह्यभावत्वाद्यवच्छिन्नविषयकत्वस्य प्रतिबंधकतानतिरिक्तवृत्तित्वान्नातिप्रसं
गइत्यर्थः ननु स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे व्यर्थमेवातिप्रसंगोद्धारे अप्रामाण्यज्ञानाभाववदादिविशिष्टयद्रूपा
वच्छिन्नविषयकनिश्चयत्वं प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणमित्येतादृशविवक्षयैतादृशातिप्रसंगवारणेपुन राम०
रसंभवः वन्ह्यभावत्वादिनाघटादिग्राहिणो वन्ह्यभाववान्ह्रद इत्यादिज्ञानस्यापि प्रतिबंधकतया तस्याधारणानुरोधेन ११

वन्हित्वाद्यवच्छिन्नप्रकारतानिरूपितत्वभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविशेष्यताकनिश्चयत्वेनैव प्रति
बंधकतया वक्तव्यतया वन्ह्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयतायाः तादृशप्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविष ता
यतात्वेनैवावच्छेदकत्वेपि अप्रामाण्यज्ञानाभावादिविशिष्टवन्ह्यभाववविशिष्टह्रदत्वावच्छिन्नविषयताकनिश्चयत्वस्या
वच्छेदकतापर्याप्त्यनधिकरणत्वादित्यतस्तृतीयायाः अनतिरिक्तवृत्तित्वरूपावच्छेदकतार्थकत्वं स्फुटयति अवच्छेदकत्वं
चेति ॥ इहलक्षणघटकत्वं स्यात् अर्थः । न च विशिष्टदोषविषयकत्वस्य प्रतिबंधकसंशयादौ सत्वात् पुनरसंभव इति वाच्यं ज्ञा
नस्येत्यत्र ज्ञानपदमनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयपरं षष्ठ्यर्थश्चाधेयत्वं तस्य च यद्विषयकत्वेऽन्वयः एवं च ता
दृशनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयकत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षणीयतया
संभवानवकाशश्च अनतिरिक्तवृत्तित्वं च व्याप्यव्यापकत्वं तच्च तन्निष्ठान्यावृत्तित्वं विशिष्टस्य विशेष्यीभूतविशिष्टविषयक विषयकत्व
त्वानतिरिक्ततया तस्यातिप्रसक्तत्वेन विशिष्टे तस्मिन्ननतिप्रसक्तत्वस्य दुर्घटत्वात् ॥ यत्तु प्रतिबंधकताशून्यतादृशनिश्च

ग.ध.
१२

यावृत्तित्वमेवानतिरिक्तवृत्तित्वमतो नोक्तरीत्याऽसंभव इति तदसत्त्वं तथा सति मूलोपात्तस्य ज्ञानस्येत्यस्य वैयर्थ्यप्रसंगात् हृदत्वाद्यव
च्छिन्नायावत्त्वभावविशिष्टहृदत्वाद्यवच्छिन्नविषयकत्वे किंचिज्ज्ञानीयविषयतानिरूपकत्वस्य प्रतिबंधकताघटकत्वादृशनिश्च
यावृत्तित्वेन शुद्धहृदत्वाद्यवच्छिन्नेऽतिप्रसंगाच्चेत्सत्यमतोऽनुमितिप्रतिबंधकतायास्तादृशनिश्चयवृत्तित्वविशिष्टहृदत्वाद्यवच्छि
न्नविषयताकत्वत्वाद्यवच्छिन्नव्यापकताविरहेणातिप्रसंगानवकाशात् अग्रे च भणितमिति त्वादिना हृदत्वादिविषयकत्वज्ञा
तिमात्रवृत्तिधर्मवत्त्वानित्यादिज्ञानस्यापि वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविषयकतया तस्य च हृदो वह्निमानित्याद्यनुमित्य
विरोधित्वाऽसंभवः ज्ञलवान्वह्निमानित्यादिस्थलीयदोषसंग्रहेणाविशेषितधर्मावच्छिन्नपक्षादिस्थलीयस्यापि किंचिद्वि
शिष्टतद्बुद्धित्वदोषस्यासंग्रहेणावपक्षतावच्छेदकांशे भ्रमात्मकनिश्चयस्याश्रयत्वात् तादृशविशिष्टघटकपदार्थ
विषयकत्वस्य ज्ञानविशेषणत्वे सर्वमाकाशवदित्यादिस्थली पक्षधर्मतादौ तद्घटकाप्रसिद्धाऽव्याप्तिः यद्रूपावच्छिन्नस्य तादृश राम०
विशिष्टघटकता तद्रूपावच्छिन्नपर्यवसितभिन्नकिंचिदवच्छिन्नविषयित्वस्यान्वयवेज्ञाने निवेशं ज्ञातित्वाद्यवच्छिन्नस्य च हृदत्वादेर्न १२

वह्न्यभाववत् हृदत्वाद्यवच्छिन्नात्मकदोषघटकतेति ज्ञातित्वाद्यवच्छिन्नहृदत्वादिविषयितातादृशविषयताभिन्नैव तच्छून्यत्वं च नो
क्तज्ञानस्येति न दोषः इत्यपि न सत् तथा सति हृदो ज्ञात्यभाववानित्यादिस्थलीयबाधादेरव्यसंग्रहापत्तेः ज्ञातित्वादिना हृदत्वा
दिरूपधर्मितावच्छेदकावगाहिनो ज्ञातिमान् ज्ञातिमानित्यादिज्ञानस्य ज्ञातित्वाद्यवच्छिन्नहृदत्वादिनिष्ठधर्मितावच्छेदकतारूप
विषयतायां निरुक्तविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमितिप्रतिबंधकस्य शून्यत्वं तेनावारणात् एवं यद्रूपावच्छिन्न
विषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञान
विशेषणतया सामंजस्यात् अप्रतिबंधकज्ञानविषयतावच्छेदकज्ञातित्वादिविशेषिते हृदत्वादिघटिततत्तद्रूपावच्छिन्नवि
षयतात्वावच्छिन्नाभावस्य दोषात्मकविशिष्टविषयतासमानाधिकरणत्वात् ज्ञानव्यावृत्तिरिति विशिष्टस्य विशिष्टविषयक [illegible]
त्वसंबंधसत्त्वेऽपि वह्न्यभाववत्त्वादिना घटाद्यवगाहिभ्रमेऽसत्त्वेऽपि तथा च विशिष्टविषयकत्वेन प्रतिबंधकतानसंभवतीति भावः
भ्रमात्मनिर्वचे पितादृशभ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेऽपि न क्षतिः नोक्तयुक्तया पर्यात्मि निवेशासंभवः तदनिवेशे पूर्वो

गाध. १२ तिप्रसंगो वा॥ नन्वविशिष्टदेशघटकीभूततदेकदेशविषयितायां स्वरूपसंबंधरूपावच्छेदकत्वमस्ति विशिष्टविषयितासामा
न्यस्य तादृशावच्छेदकत्वविवक्षणे तिप्रसंगवारणासंभवात्तदेव कथं न विवक्षितमिति॥ न च सामान्यपदस्य व्यापकतार्थक
तया प्रतिबंधकतावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वं प्रवेश्यं तदपेक्षया प्रतिबंधकतायां विशिष्टविषयितात्वव्यापकत्व
निवेशनमेवोचितमिति वाच्यं यतो नन्वभाववविशिष्टह्रदादिनिरूपितविषयिताया अनुमित्यप्रतिबंधकत्वसंशयाहार्यप्र
मारूपज्ञानास्कंदितज्ञानसाधारण्यतया नानुमितिप्रतिबंधकतायाः तद्व्यापकत्वमित्यनाहार्याप्रामाण्यज्ञानानास्कं
दितनिश्चयवृत्तित्वविशिष्टाया विशिष्टविषयितात्वव्यापकत्वं प्रतिबंधकतायां भवता विवक्षणीयं तदपेक्षया लाघवे
न स्वरूपसंबंधरूपावच्छेदकतायां विशिष्टविषयितात्वव्यापकत्वमेव विवक्षितुमुचितं तथा सति निश्चयत्वाघटितनिवेशात्सम
नाकारज्ञानेषु विषयिताभेदस्याप्रामाणिकत्वात्संशयादिज्ञानीयविषयताया अपि निश्चयत्वादिविशिष्टीयतया प्रतिबं राम.
धकतावच्छेदकतया प्रतिबंधकतावच्छेदकतायां बाधादिरूपदोषनिरूपितविषयितात्वव्यापकताया अक्षतत्वात्॥ न च व १२

न्वभाववान् ह्रदो वह्निमानित्याहार्यज्ञानीयवन्ह्यभाववविशिष्टह्रदादिविषयितानामनाहार्यज्ञानसाधारणी तादृशाहार्य
ज्ञानसमानाकारकानाहार्यज्ञानाप्रसिद्धेः ह्रदो वन्ह्यभाववान्निर्धूम इत्यनाहार्यज्ञानीयवन्ह्यभाववविशिष्टह्रदादिविषयिता वन्ह्यादि
प्रकारतानिरूपिततादृशाहार्यज्ञानीयविशिष्टह्रदादिविषयिताया भिन्नत्वात् तथा चानाहार्यत्वविशिष्टविषयिताया स्वप्रति
बंधकतावच्छेदकतया तद्दर्शिताहार्यज्ञानीयविषयितासाधारण्याद्विशिष्टविषयितात्वव्यापकत्वमिति वाच्यं॥ एवं सत्य
नाहार्यज्ञानीयविशिष्टविषयतात्वव्यापकताया एव विवक्षणीयतया तावतापि संशयाद्यन्यत्वाप्रामाण्यज्ञानानास्कंदित
त्वपरिप्रवेशेन लाघवानुपपत्तात्। किंच स्वरूपसंबंधरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन वन्ह्यभाववत्तानिश्चय
ए विशिष्टस्य पाषाणमयत्वादिविशिष्टपक्षादेर्ज्ञानस्य वन्ह्याद्यनुमितिप्रतिबंधकतया तदवच्छेदकविषयिताकपाषाणमयत्वा
दिविशिष्टपक्षादावतिव्याप्तेः अनतिरिक्तवृत्तित्वस्यावच्छेदकत्वनिवेशमते तादृशविशिष्टविषयतायाः पाषाणमयत्वाद्यव
च्छेदेन वन्ह्यभाववत्तानिश्चयविशिष्टज्ञानसाधारण्यानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वेनातिप्रसंगानवकाशात्॥ न चा

ग.ध. नतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशोपि लाघवच्छेदेन वृथैव भाववत्ताघटितस्य वर्ण्यभावत्वज्ञानादिमद्वृत्तिज्ञ
१४ लादिविशिष्टस्य ह्रदादिरूपपक्षस्य ज्ञानवत्त्वग्रहभावत्वा निष्पादितज्ञानस्य हितस्य ज्ञानवत्त्वग्रहदशायामपि ज्ञानस्य तादृशज्ञा
नविशिष्टतादृशज्ञानत्वेनैव प्रतिबंधकतया तादृशप्रतिबंधकताभून्यज्ञाने विषयस्य सत्प्रतिपक्षात्वेन तत्त्वकस्य वार
णाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंधकतायामनुपवेशनीयतया मन्मतेपि तत्र नातिप्रसंग इति वाच्यं ज्ञा
नवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंधकताविशेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणत्वहेतुमत्पक्षरूपसत्प्र
तिपक्षाव्याप्तेः साध्याभावांशे तद्व्यापकतायां च विशिष्टतद्वत्ताज्ञानत्वेन तत्र साध्याभावधर्मिकतद्व्यापकतायाः
विशिष्टतद्वत्ताज्ञानसाधारणानुरोधेनानवच्छिन्नप्रतिबंधकत्वस्यैवोपपत्तेः तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्यान
वच्छिन्नप्रतिबंधकतांतरे मानाभावं हि तु विशिष्टे प्रतिप्रसंगस्तु विवक्षणीयविशिष्टांतराघटितत्वविशेषणेनैव राम०
वारणीयः न च ज्ञानद्वयसाधारणप्रतिबंधकतायाः प्रत्येकज्ञानविषयविशिष्टविषयकत्वं नानतिरिक्तवृत्तित्वरू १४

पा वच्छेदकता वक्तव्या च दर्शितविशिष्टघटकस्य प्रत्येकज्ञानविषयस्य न निरुक्तविशिष्टात्मकत्वेति निरुक्तविशिष्टांत
राघटितत्वं उक्तविशिष्टस्यापेक्षितमेवेति वाच्यं वक्ष्यमाणविशिष्टांतराघटितत्वस्य यादृशविशिष्टविषयकनिश्चयत्ववि
शिष्टया तादृशविशिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तिता तादृशविशिष्टद्वयाघटितत्वे सति यादृशवि
शिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तिता तादृशविशिष्टांतराघटितत्वरूपतया उक्तविशिष्टवारणासंभ
वात् न चैवमुक्तसत्प्रतिपक्षाव्याप्तिः तस्य प्रतिहेतुव्यापकताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरु
क्तविशिष्टद्वयघटितत्वादिति वाच्यं सत्प्रतिपक्षघटकतादृशविशिष्टद्वयविषयताभिन्नानिरुक्तविशिष्टद्वयविषयि
तास्वरूपप्रतीतिविषयत्वस्य विशिष्टद्वयाघटितार्थत्वात् यत्र सत्प्रतिपक्षाप्रसिद्धिस्तत्राभिन्नांतमनुपादेयमेव साध्या
दिभेदेन लक्षणभेदात् स्वमात्मकज्ञानीयविषयतासाधारणरूपेणैव वा प्रतिहेतुव्यापकताविशिष्टसाध्याभावा
तो दिविषयित्वं पादेयं न च दर्शितविशिष्टस्य सत्प्रतिपक्षतानस्वीक्रियते अपितु हेतुतावच्छेदकाघटितसाध्याभावाभा

ग.ध. क
१५

ववद्वृत्तिमत्पक्षात्तत्त्वविशिष्टस्यैवव्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्पक्षस्योक्तरीत्यासंभवे तद्धर्मव्या
पकसाध्याभावकालीनतद्धर्मविशिष्टपक्षादिव्यावृत्तिरप्यशक्यास्यादतस्तद्विशेषेणाव्यापकताघटितविशिष्टमत्र
स्वालक्ष्यतायाराव्ययुक्तत्वात्तथाचोक्तप्रयासमपेक्ष्यज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानिवेशनमेवोचि
तमिति वाच्यं । एवमपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्य मतभेदेनासाधारण्यविशेष
रूपस्य विषयितायाः पक्षधर्मिकप्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतापन्नभेदावच्छेदकत्वात्प्रतिबंध
कतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशासंभवात् दर्शितातिप्रसंगवारणाय च निरुक्तविशिष्टद्वयाघटितत्वस्यैववि
वेशनीयत्वात् । न च पक्षवृत्तित्वविशेषितं प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरू
पं वाच्यं पक्षवृत्तित्वाघटितविशिष्टविषयितायाश्च प्रतिबंधकज्ञानसाधारणतया प्रतिबंधकतानवच्छेदकत्वात्तादृशस्य राम०
वासाधारण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतुसाध्यव्यापकाभावप्रतियोगित्वविशिष्टप्रकृतहेतुरूपनिरुक्तविशिष्टद्व १५

यघटितत्वयानिरुक्तविशिष्टद्वयाघटितत्वनिवेशोऽपि न संभवतीति वाच्यं । पक्षवृत्तित्वाघटितविशिष्टस्यैवासाधारण्य
रूपतायामविरोधेऽपि फलतः प्रतिरोधकस्य तत्तदन्यत्वेन वा विरोधिविशेषणीयमिति पंक्तिकार्थस्यानवसरे संपादनीयत्वा
त्तन्नत्वनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशो व्यभिचारादिघटितपदार्थान्तरेष्वतिव्याप्तिः तद्विषयकत्वस्यापि प्रति
बंधकतानतिरिक्तवृत्तित्वादतस्तद्व्यावृत्तिविशेषणीयं चेति । तादृशत्वं लक्षणमिति शेषः तादृशविशिष्टेति । स्वानुमितिप्रतिबं
धकतायां यद्रूपावच्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः व्यभिचारत्वाद्यवच्छिन्नस्य व्यभिचारत्वादिरूपतादृश
रूपावच्छिन्नघटितत्वादसंभव इत्यतो व्यंतरेति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नार्थकं अतः शुद्ध
व्यभिचारादेर्मैयत्वविशिष्टव्यभिचाराद्यभिन्नत्वेऽपि न क्षतिः तदघटितत्वं तदविषयकप्रतीतिविषयत्वं स्वेवानुमितिप्र
तिबंधकतायां यादृशरूपावच्छिन्नविषयकत्वमवच्छेदकं तादृशं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं त
दवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नत्वसमुदितार्थः । यद्रूपावच्छिन्ने लक्षणं संगमनीयं तदेव स्व

ग॰ध॰
२६ स्वा
क
न

पदार्थः मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतत्वाभत्वादयस्तदवच्छिन्नाविषय
कप्रतीतिविषयतावच्छेदकं व्यभिचारं दीतितदवच्छिन्नेन लक्षणसमन्वयः प्रमेयत्वविशिष्टव्यभिचारत्वादेः स्वावच्छि
न्नविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वावच्छिन्नाविषयप्रतीतिविषयतावच्छेदकत्वाभावान्न तदवच्छि
न्नेऽव्याप्तिः प्रमेयत्वविशिष्टव्यभिचारादेरपि प्रमेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वा
त्तद्दोषः स्यादतस्तादृशरूपाश्रयधर्मिणां तदवच्छिन्नाविषयकप्रतीतिविषयत्वेनाविशिष्यस्वमेव तादृशवि
षयतावच्छेदकत्वेन विशेषितं मेयत्वविशिष्टव्यभिचारत्वाश्रयाविषयकत्वस्य व्यभिचारत्वावच्छिन्नाविषय
कप्रतीतौ दुर्घटत्वाद्दोषः । अत एव स्वाश्रयाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्वनिवेशः स्वावच्छिन्नावि
षयकप्रतीतिविषयवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभिचारत्वादेरपि प्रमेयत्वादिना व्यभिचारत्वाद्यवच्छि राम॰
न्नाविषयकप्रतीतिविषयव्यभिचारादौ वर्तमानत्वादसंभवइत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषि २६

तः प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाप्रकप्रतीतिविषयतावच्छेदकं यद्गगनाभाववन्मेयत्वा
दिं तदाश्रयाविषयकप्रतीत्यप्रसिद्ध्याऽव्याप्तिरतस्तदवच्छिन्नाविषयकत्वनिवेशः अत एव तादृशविशिष्टान्त
राविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकधर्मविशेषणतापेक्षया ज्ञानस्येतरत्र ज्ञानपदार्थ
तादृशविशिष्टान्तराविषयकत्वनिवेश एवोचितः । एवं च निरुक्तस्वरूपमशाकल्येऽपि तद्विषयकनिश्चयस्येतरत्र
निश्चयत्वावतन्निवेशफलं द्रव्यत्वादिन्यवच्छेद्यं अयं धूमव्यभिचारी वह्निमान्धूमवान्वह्नेरित्यादौ बाधादेर्व्यभिचा
रादिघटितत्वात्तत्राव्याप्तिः न च यद्रूपावच्छिन्नाविषयकत्वं स्वावच्छिन्नाविषयकत्वावच्छिन्नप्रतिबंधकतासामान्या
वच्छेदकं तादृशरूपान्तराघटितत्वस्य विवक्षितत्वान्न दोषः व्यभिचारस्योक्तबाधविषयकत्वान्यूनवृत्तित्वासिद्धा
नप्रतिबंधकतावच्छेदकविषयिताकत्वेऽपि तादृशप्रतिबंधकतासामान्यानिर्गततानुमितिप्रतिबंधकतावच्छेदकवि
षयताकत्वविरहेण तद्घटितत्वस्य किं चित्करत्वादिति वाच्यं व्यभिचारत्वरूपस्वावच्छिन्नविषयकत्वावच्छिन्नप्र

स्याद्भिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकः कश्चित् २

ग.ध. १७ प्रतिबंधकतासामान्यावच्छेदकविषयतानिरूपकतावच्छेदकस्य तदवच्छिन्नाविषयकप्रतीतिविषयितावच्छेदकस्याप्र
सिद्ध्या असंभवात् व्यभिचारत्वप्रमेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविधविषयितानिरूपकतावच्छेदकत्वात् तस्य च
व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् । न चैवमवच्छिन्नाविषयकप्रतीतिविषयताव
च्छेदकीयस्य सर्वभूतं यत्तत्प्रमेयत्वविशिष्टव्यभिचारत्वादिन्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य
विवक्षणीयतया न दोष इति वाच्यं तथा सति धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ बाधत्वाद्यवच्छिन्न
घटकतावच्छेदकस्य धूमव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नवि
षयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकव्यभिचारत्वकल्पनादव्याप्तेर्दुर्वा
रत्वात् ॥ न च स्वावच्छिन्नविषयितावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतयत्किंचिद्विषयितं यादृशयादृशध राम. १७
र्मावच्छिन्नानिरूपितं तादृशधर्मावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकं यत्त्वं तद्रूपावच्छिन्नत्वमेव समुदि

तलक्षणार्थः प्रमेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतायाः
धूमव्यभिचारत्वाद्यवच्छिन्ननिरूपितविषयितायाः प्रमेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन स्वाव
च्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य च स्वस्मिन्सत्त्वेन प्रमेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपाद
तुमशक्यत्वात् व्यभिचारत्वादिविशिष्टविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदिकायाः कस्याश्चिद्वि
षयितायाः व्यभिचारत्वादिविशिष्टानिरूपितत्वासंभवात् तादृशविषयितायाः यादृशधर्मविशिष्टानिरूपितत्वं घटत्वप्रमेय
त्वविशिष्टव्यभिचारत्वादेरेव तादृशत्वात् तदवच्छिन्नविषयकप्रतीतिविषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनो
पादातुमशक्यत्वान्न कश्चिद्दोषः स्वयं वा यद्धर्मावच्छिन्नविषयितावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूत
विषयितात्वं यद्धर्मावच्छिन्नानिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव समुदितार्थ इति वाच्यं बाधविशिष्टव्यभिचारत्वाद्यव
च्छिन्ने प्रतिप्रसंगात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नैर्बाधज्ञानप्रतिबंधकतायां केवलव्यभिचारविषयतायाः

ग·५
१८

त्वादृशव्यभिचारत्वावप्रतिबंधकतायां च केवलत्वावधिविषयितायाश्चानवच्छेदकत्वेन वा धूमविशिष्टव्यभिचारत्वावच्छि
न्नविषयताया एव तथाविधप्रतिबंधकतासामान्यावच्छेदकत्वं तस्यास्तादृशधूमविशिष्टनिरूपितत्वस्यावश्यकत्वात् प्र
थमे कल्पत्वपदेन चरमकल्पे च यत्पदेन तस्योपादानसंभवात्। यत्तु वह्न्यभावादिविशेषितावच्छेदककवह्न्यादिप्रकारकस्तु
द्धि धूमव्यभिचारविशिष्टवह्न्यादिविशेषितावच्छेदकस्य धूमव्याप्यतया वह्न्यादिप्रकारकस्य हेत्वाभासत्वं संभवेत
त्तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसंदेहात्मकत्वेनानुमितेरप्रसिध्या तादृशानुमितिप्रतिबंधकताघटितपद्या
र्थतलक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिहेतुकदोषाव्याप्तिः स्वयमेव वक्ष्यते इति तद्धारणाय यत्समूहेत्यन्तं भवतु ता चेर
वदेवं तथापि विशेषगुणावच्छिन्नो घटो गुणसामान्यवद्भिन्न इत्यादौ दर्शितसमूहात्मकानुमितिप्रसिध्या विशिष्टगुणाव
च्छिन्नादिरूपाश्रयासिद्धेर्गुणत्वाद्यवच्छिन्नाद्यवाधघटितायाः संग्रहस्यावश्यकत्वात्। यदि च तत्र घटत्वावच्छेदेन गुणावत्वमेव वा श्रया राम०
श्रयासिद्धिस्तत्र घटत्वस्याभानाधिकरण्येन घटत्वावच्छेदेन वा विशिष्टगुणावत्वं तस्याश्च गुणात्वरूपसामान्यधर्मावच्छिन्न १९

घटत्वव्यापकताघटितोक्तवाक्यस्य न प्रवेशः विशेषगुणत्वेन घटत्वव्यापकतायास्तत्राप्रवेशे तथापि सामान्यरूपेण व्यापकताया
स्तद्वत्तं भावादिति न तादृशासिध्यसंग्रह इत्यप्युच्यते तथापि विशेषगुणाभाववान् छितीत्यादिपक्षावच्छिन्नो घटो गुणसामा
न्याभाववानित्यादौ क्षितीत्यादिलक्षणावच्छिन्ने घटे विशेषगुणवत्त्वरूपाश्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वस्यावश्यव
शावश्यकत्वाद्यथाश्रुतलक्षणोक्ततत्संग्रहस्यावश्यकत्वाद्युक्तविशेषणानुपपत्तिः। वस्तुतस्तु तत्र वदंतीत्यादिनि क्र
मकत्वे पि प्रमेयत्वविशिष्टव्यभिचारादिवारणाय विशिष्टांतरघटितत्वस्य निवेशनीयतया तन्मते दर्शितबाधासंग्रहे
दोषस्य दर्शनेन स्वावच्छिन्ननिरूपितविषयतात्वावच्छिन्नयत्किंचित्प्रतिबंधकतावच्छेदकविषयिताकविशिष्टनिरूपितवि
षयिताव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितलक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं संतद
वच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतावच्छेदकविषयिताकधूमव्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्याप्य
त्वाच्च। उक्तस्थले विशेषगुणविशिष्टघटादिरूपाश्रयासिद्ध्यादिविषयकत्वावच्छिन्नविशिष्टपक्षस्य ह्रदादिनिरूपितयत्किंचि

ग.ध. १९

प्रतिबंधकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वस्य तादृशाश्रयासिद्ध्यादिनिरूपितत्वव्याप्यत्वात्तत्र लक्षणा
समन्वयः प्रतिबंधकतायां पर्याप्तत्वनिवेशान्तोक्तरीत्या बाधविशिष्टव्यभिचारादावतिप्रसंगः स्वावच्छिन्ना निरूपितविशिष्ट
विषयितानवच्छिन्नप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताको यो धर्मस्तद्वत्त्वं वा समुदितलक्षणार्थः मेयत्वविशि
ष्टव्यभिचारत्वादिकं नैतादृशं सत्तदवच्छिन्ना निरूपितशुद्धव्यभिचारत्वाद्यवच्छिन्नविषयितावच्छिन्नायामेव प्रतिबंधकतायां
तदवच्छिन्नविषयितायामवच्छेदकत्वात् । उक्तस्थले च स्वाश्रयासिद्धिविषयकत्वस्य तदनिरूपितबाधविषयितानवच्छिन्नाया
विशिष्टपक्षस्य हृदप्रतिबंधकतातदवच्छेदकत्वाद्वल्लक्षणासमन्वय इति परास्तं । यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्त
त्वादिनिष्टुष्टकल्पे अनुमितिप्रतिबंधकतायाः अघटकत्वात् प्रतिबंधकतायां विशिष्टान्तरविषयकत्वानवच्छिन्नत्वविशेषणा
दानस्यासंभवेन यत्पदार्थस्यैवैतादृशपदार्थान्तराघटितत्वेन विशेषणीयतया उक्तबाधावकाशे रशक्यपरीहारत्वात् अत्र राम०
केचित् स्वसजातीयविशिष्टान्तराघटितत्वमेव यत्पदार्थे विशेषणं देयं सजातीयं च हेत्वाभासविभाजकरूपेणात्मरूपं वाधत्वव्य १९

भिचारत्वादितेन रूपेणाव्यभिचारादेर्न बाधादिसाजात्यमिति व्यभिचारघटितबाधादौ नाव्याप्तिः न चैवं यद्विषयकनिश्चयस्य वि
रोधिविषयताप्रयुक्त उभयाभावस्तत्त्वमित्यत्र विरोधिविषयताप्रयुक्तदलस्य वैयर्थ्यं घटादेस्तादृशरूपेण सजातीयत्वाप्रसि
द्धौ वानतिप्रसंगादिति वाच्यं स्वसजातीयविशिष्टान्तराघटितं यत्त्वं तद्विषयकप्रतीतिविषयत्वस्य विवक्षया अनुयोगिनीत्वर्त्ते
नन्तर्भावेन पदार्थान्तरे अतिप्रसंगवारकतयात् दलसार्थक्यात् न च व्यभिचारविशिष्टमेयत्वादेर्हेत्वाभासत्वविरहाद्धेत्वाभास
विभाजकरूपेण सजातीयाप्रसिद्ध्या तस्य यत्पदेनोपादानुपपत्तया मेयत्वविशिष्टव्यभिचारादिकमेव यत्पदेनोपादेयं त
स्य शुद्धव्यभिचारादिभिन्नतया व्यभिचारत्वादिरूपहेत्वाभासविभाजकरूपेणात्मसजातीयाप्रसिद्धेरिति तद्विषयकप्रतीतिवि
षयत्वस्य व्यभिचारविशिष्टमेयत्वादौ सत्त्वात् अतिप्रसंग इति वाच्यं विशिष्टान्तराघटितत्वेनाघटितस्य साध्यसाधनग्रहादि
रोधिज्ञाननिष्ठविषयतासंबंधेन व्याप्तिग्रहप्रतिबंधकतानतिरिक्तवृत्तित्वादिरूपस्य व्यभिचारादिविभाजकस्यात्र निवेशा
त् तादृशरूपस्य च व्यभिचारविशिष्टमेयत्वादिसाधारणत्वादित्याहुः । तन्न व्यभिचारादिघटितबाधादावपि विशिष्टान्तराघटित

ग.ध.
२०

त्वाद्यघटितव्यभिचारत्वादिसत्त्वेन तद्घटकव्यभिचारादेर्व्यभिचारत्वादिना तत्सजातीयत्वापातात्तत्संग्रहानुपपत्तेः इदम
त्रावधेयं प्रतियोगिनिःस्वान्तर्भावेण ताद्दशलक्षणाकरणेपि व्यभिचारघटितवाधादावव्याप्तिवारणमशक्यमेव । तत्र
सजातीयविशिष्टान्तरघटितत्वस्य धूमव्यभिचारिवह्निमत्त्वेन तद्घटितत्वस्य तद्वाधादावसत्त्वात् । यदि च तद्घटि
तत्वं तदुपदर्शितविषयतापर्याप्त्यनधिकरणत्वं । तच्च स्वघटमेव । एकदेशपर्याप्तविषयतायाः समुदायपर्याप्तेस्तु
स्वेतेतदाद्यव्याप्तिर्दुर्वारैव । निरुक्तव्यभिचारत्वेन सजातीयविशिष्टान्तरघटितं यत्त्वं ताद्दशवाधस्य तदपर्याप्तविष
यतायास्तत्राभावात् न च स्ववृत्तियावद्धेत्वाभासविभाजकरूपेण साजात्यं विवक्षणीयं तथा च वाधादिघटकव्यभि
चारादेर्वाधत्वाद्यसत्त्वात् ताद्दशवाधादेः सजातीयत्वमतस्तत्संग्रहः संभवतीति वाच्यं । एवं सति वाधविशिष्टव्यभिचारा
देः स्ववृत्तिवाधत्वव्यभिचारत्वादियावद्धर्मेण सजातीयविशिष्टान्तरस्य व्यभिचारविशिष्टवाधादेः प्रसिद्धत्वेन तद्घटितत्वा राम॰
सत्त्वेनातिव्याप्तेस्तस्माद्व्यभिचारादिघटितवाधादेः संग्रहप्रकारोऽग्रे दर्शनीय एवादरणीयं । मेयत्वविशिष्टव्यभिचारादे २०

ताद्दशव्यभिचारत्वाद्यवच्छिन्नेनातिप्रसंगेन दोषताप्रसंगः । अत एव मेयत्वविशिष्टव्यभिचारो दोष इत्यादिव्यवहाराभावान्नेष्टा
व्य पत्तिः संभवति न च विशिष्टव्यभिचारादेः शुद्धव्यभिचारत्वादिना दोषत्वस्याक्षततया उक्तविशेषणादानेपि ताद्दशव्यवहाराप
त्तिर्दुर्वारैवेति तत्रेष्टापत्तौ च यथोक्तविशेषणाम् इति वाच्यं दोषादिपदस्य निरुक्तविशेषणावच्छिन्नानुमितिप्रतिबंधकता
वच्छेदकस्वावच्छिन्ननिरूपितविषयिताकत्वेनान्वयितावच्छेदकधर्मबोधकतया व्युत्पन्नतया प्रकृते च मेयत्वविशिष्ट
व्यभिचारत्वादिरूपान्वयितावच्छेदकस्योक्तविशेषणविरहेणातिप्रसंगाभावादिति इदं यत्तत्वाश्रयासिद्ध्यादिस्थले
पक्षतावच्छेदकाभाववत्पक्षकत्वादिकमेव दोषस्तस्यैव हेतुनिष्ठतया हेतोर्दुष्टव्यवहारनिर्वाहकत्वात्ताद्दशधर्मस्य
च ताद्दशाभाववत्पक्षादिरूपताद्दशविशिष्टान्तरघटिततयाऽव्याप्तिरित्यत आह एवं चेति ताद्दशविशेषणादाने चेत्यर्थः
ग्र पक्षतावच्छेदकादीत्यत्रादिपदात् साध्यादिपरिग्रहः पर्वतादिधर्मिककांचनमयत्वादिविशिष्टबुद्धौ पर्वतः कांचनमयत्वा
भाववानित्यादिधर्मिविशेष्यकनिश्चयस्य पर्वते कांचनमयत्वं नास्तीत्यादिधर्मिविशेषणकनिश्चयस्यापि विरोधित्वमा

ग·ध·
२१
नुमितिकमतस्तद्विषयस्यापि दोषत्वमाहुस्तन्निष्ठइतिस्वव्याप्यतासंबंधेनपक्षविशिष्टइत्यर्थः वाकारः समुच्चये साधनत्वद्वृत्ति
साध्याभाववद्वृत्तिसाधनधर्मिकसाध्याभाववद्वृत्तित्वप्रकारकज्ञानेसाधनधर्मिकव्याप्तिज्ञानेप्रतिबंधकं साधनवृत्तिसाध्याभा
ववृत्तिज्ञानेपिसाधनेसाध्याभाववद्वृत्तित्वं तुल्यविषयित्वेयुतवानियमतः भासतइतितदपिमिज्ञानप्रतिबंधकमितिमताभि व्या
प्रायेण। तादृशज्ञानेनियमतस्तदभानेपिमणिमंत्रादिन्यायेनतस्यव्याप्तिज्ञानप्रतिबंधकत्वमितिप्राचीनमताभिप्राये
णेदंदोषइति नतुपक्षतावच्छेदकाभाववत्पक्षकत्वादिरितिशेषः तथाचालक्ष्यत्वान्नातिव्याप्तिरितिभावः। ननुपक्षता
वच्छेदकाभाववत्पक्षादीनांहेत्वाहतित्वात्कथंहेतौ ततोदुष्टताव्यवहारइत्यतआह येनकेनापीतिएकज्ञानविषयत्वादिने
त्यादिः तद्ज्ञानं तदवच्छिन्नः दुष्टः दुष्टपदप्रतियाथः। तथोवह्नेतोस्तादृशदोषानाधिकरणत्वेपिनक्षतिः दुष्टइत्यादेःसामान्य
तः संबंधिनएवनिष्ठार्थत्वात् एवंचैकज्ञानविषयत्वादिनावन्ह्यभाववत् हृदादिरूपदोषस्यधूमादौसत्वेपिपर्वतादौ राम०
वन्ह्यादिसाधनेतस्यदुष्टव्यवहारविषयतापत्तेस्तद्रूपावच्छिन्नपक्षसाध्यहेतुवाचकपदसमभिव्याहारस्थलेदुष्टपदस्यतद्रू २१

पावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्मावच्छिन्नसंबंधिबोधकत्वमु
त्पत्तापूर्ववत्त्वारेणापिपूर्ववदेववन्हिनाधूमसाधनेसम्भोदहइत्यादिव्यवहारेणतिरुक्तदोषमात्रस्यदुष्टव्यवहारविषय
तावच्छेदकत्वदुर्वारइतिप्रकृतहेतुतावच्छेदकविशिष्टः संबंधोनिष्ठार्थतावच्छेदकोवाच्यः एतद्धन्नाभिप्रायेणप्रकृतहेतुरि
त्युक्तं हृदेवन्हेः साधनेधूमोदुष्टइत्यत्रहृदत्वावच्छिन्नपक्षकवन्हित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंध
कतावच्छेदकत्वावच्छिन्नविषयिताकधर्मावच्छिन्नसंबंधीधूमइत्यन्वयबोधः। तत्रप्रतिबंधकतावच्छेदकत्वावच्छिन्नवि
षयिताकधर्मविशिष्टएवदुषधातोरर्थः साधनपदंलक्षणयाधूमत्वावच्छिन्नहेतुकानुमितिपरं तत्रहृदइतिसप्तम्यंतार्थ
हृदत्वावच्छिन्नपक्षकत्वस्यवन्हेरितिषष्ठ्यंतार्थस्यवन्हित्वावच्छिन्नसाध्यकत्वस्यचान्वयः तादृशानुमित्यन्वितसप्तम्यर्थनि
रूपितत्वस्यदुषधात्वर्थैकदेशेप्रतिबंधकत्वेऽन्वयः एवंचपर्वतेवन्हेः साधनेधूमोदुष्टइत्यत्रपर्वतत्वावच्छिन्नपक्षकवन्हि
त्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधकतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्मविशिष्टसंबंधी

ग.ध. २२

धूमइत्येवप्रतीयेतेतादृशधर्मस्याप्रसिद्धएवेतिनतथाव्यवहारः पक्षविशेष्यादिकमनंतर्भाव्य धूमोदुष्टइत्यादिव्यवहा
रस्तदुष्टत्वएवेतिदिक् साध्यनिष्ठसाध्याभाववद्वृत्तित्वादेरव्यभिचारतयाप्रसिद्धिर्नतु तद्विशिष्टसाधनादेः अतो
नतस्यदोषत्वमितिकश्चिदंहव्याचष्टेपितल्लक्षणमन्यथैवोन्यथातिप्रसंगात् तादृशव्याख्यानुपपन्नत्वात्तादृशी
तिःयद्रूपावच्छिन्नत्यर्थकंज्ञानंज्ञानत्वावच्छिन्नंतस्यधर्मिणः श्रुद्धत्वद्धर्मावच्छिन्नस्यैतत्संबंधेनविशेषः तादृशधर्मव
त्वं तद्रूपावच्छिन्नवत्त्वं साधनादिविशेष्यकसाध्याभाववद्वृत्तित्वादिविशेष्यकज्ञानस्यव्याप्यादिज्ञानप्रतिबंध
कत्वेपिसाध्याभाववद्वृत्तित्वादेराधेयतासंबंधेनसाधनीयत्वादिकं न दोषः साधनादेः साध्याभाववद्वृत्तित्वादिधर्म
ताविरहात् अत्राप्यवच्छेदकत्वं पूर्ववत् न तु स्वरूपसंबंधविशेषः पक्षतावच्छेदकावच्छिन्ननिष्ठकेवलाभावत्वावच्छि
न्नवत्त्वादावतिप्रसंगात् तदवच्छिन्नधर्मिकतद्रूपावच्छिन्नवत्ताज्ञानत्वस्यापि प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वा राम० २२
त्वात्अवच्छेदकतापर्याप्तिविवक्षणेच ह्रदत्वाद्यवच्छिन्ननिष्ठवह्न्यभावत्वाद्यवच्छिन्नवत्त्वेऽव्याप्तिः यतोवह्नित्वादि

त्वाद्यवगाहिनोपिह्रदोनवह्निमानित्यादिनिश्चयस्य ह्रदोवह्निमानित्याद्यनुमितिप्रतिबंधकतया ह्रदत्वाद्यवच्छि
न्नविशेष्यकवह्न्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वेन न प्रतिबंधकता अपि तु तद्विशेष्यकवह्नित्वाद्य
वच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताकनिश्चयत्वेनैव अतस्तादृशमेवरूपंप्रतिबंधकतावच्छेदक
तापर्याप्त्यधिकरणं न तु ह्रदत्वाद्यवच्छिन्नधर्मिकवह्न्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वमितियद्रूपपदेनवह्न्य
भावत्वाद्युपादानं न संभवतीति पर्वतो वह्न्यभाववानित्यादौ पर्वतत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्नवत्त्वरूपबाध
दाववच्छेदकतापर्याप्तिघटितलक्षणस्यापि सत्त्वात् नासंभवोऽभिहितः पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्नित्वाव
च्छिन्नप्रकारकनिश्चयत्वे पर्वतो वह्न्यभाववानित्यनुमितिप्रतिबंधकतावच्छेदकतापर्याप्तिः पर्वतो वह्न्यभाववानि
त्यादौ पर्वतत्वाद्यवच्छिन्ननिष्ठवह्नित्वाद्यवच्छिन्नवत्त्वरूपबाधादेरसंग्रहभयेन यद्रूपावच्छिन्नधर्मिणि यद्रूपावच्छि
न्नप्रकारतानिरूपितयद्रूपावच्छिन्नप्रकारताकनिश्चयत्वेन प्रतिबंधकता तद्रूपविशिष्टे तद्रूपावच्छिन्नविशेषित

ग०ध० तद्रूपावच्छिन्नवत्त्वं दोष इति विवक्षायामसंभवात् । अत्र साधननिष्ठसाध्याभाववद्वृत्तित्वादेरिव साध्याभाववद्वृत्तिसाधना
२३ देरपि दोषत्वं स्यादिति चिरंतनव्याख्यानायासोऽनर्थक इत्यस्वरसः कश्चिदित्यनेन सूचितः । यथाव्याख्याने यथाश्रुतार्थे स०
निर्वह्निः पर्वतो वह्निमानित्यादौ प्रकृतपक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारका
अ नुमितेरप्रसिद्ध्या [illegible] प्रसिद्धिं दर्शयिष्यति तत्र विशिष्य पक्षतावच्छेदकाद्यप्रवेशेनाप्रसिद्धिरुत्पन्ना स्तन्निवेशनप्रयोजन
माह । अग्रे चेति । पर्वतादेः कांचनमयत्वविरह इत्यादौ सर्वत्र न दोष इति संबध्यते तेन यादृशपक्षतावच्छेदकाद्यप्रवेशे पू
य र्वोक्तयुक्त्याऽसंभववारणाय किंचिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबंधकत्वमेव निविश्य अभि
ति पर्वतो वह्निमान् धूमादित्यादौ पर्वतनिष्ठकांचनमयत्वाभावादावतिव्याप्तिः । तस्यापि कांचनमयत्वादिसहितसाध्या
पर्वतादिरूप ध्यं यत्किंचिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबंधकज्ञानविषयत्वादित्यभावः । आदिपदं वत्त्वांतर राम०
संग्रहार्थं प्रकृतानुमित्यविषयपदार्थाभावेऽतिव्याप्तिं सूचयितुं तद्विषयसाध्याद्यभावे तां सूचयति दूरदेशेति दूरनिष्ठ २३

तिर

वह्निशून्यत्वं धूमशून्यत्वं चेत्यर्थः । ह्रदादिनिष्ठाभावेऽतिव्याप्तिसूचनं च प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतपक्ष
य कत्वरूपसमुदायदलस्यैव निवेशो बोध्यः महानसीयेति महानसीयत्वाभाववैमहानसीयधूमाभाववत्त्वमर्थः । अत्रातिव्या
प्तिसूचनं प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोरनिवेशे बोध्यं इदमुपलक्षणं साध्यहेत्वोरनिवेशेऽपि तत्त
त्त्वाभावादावव्याप्तिर्बोध्या प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे पक्षधर्मताज्ञानप्रतिबंधकतामादा
यातिप्रसंगं सूचयित्वा व्याप्तिज्ञानप्रतिबंधकतामादायातिप्रसंगं सूचयति मेयत्वस्यापि वह्निव्यभिचार इत्यनेनान्व
यः । अत्रातिव्याप्तिस्तादृशदलसमुदायस्यैवानिवेशे बोध्या प्रकृतहेतुकत्वं च निवेश्याप्येतद्दोषस्य शक्यवारणात
या हेतुतावच्छेदकनिवेशायाह । केवलधूमस्यापि वह्निशून्यदेशांतरवृत्तिधूमव्यक्तिव्यावर्तकविशेषणानवच्छिन्न
स्येत्यर्थः । साध्यतावच्छेदकानिवेशे पूर्वं साध्यवत्ताज्ञानविरोधिविषयेतिव्याप्तिं दर्शितेदानीं व्याप्तिज्ञानविरोधिवि
षयेतिव्याप्तिं दर्शयति विशिष्टधूमस्य वा पर्वते पर्वह्निव्यभिचार इति दोषलक्षणादुष्टलक्षणेऽपि पक्षतावच्छेद

ग॰ध॰ २४

कादिनिवेशस्यावश्यकतां दर्शयति नचेत्यादिना तत्संबंधेनेति तत्र पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नवह्निसाधने तस्य विशि
ष्टधूमत्वावच्छिन्नस्य पक्षादौ पक्षतावच्छेदकादेर्यादृशसंबंधेन विशेषणत्वं यत्राभिमतं तत्र तत्संबंधेन तदवच्छिन्न
त्वं निवेश्यमिति सूचयितुं तत्पदस्य केतु क्तं पक्षतावच्छेदकादिनिवेशो पक्षादिनिवेशस्याप्रयोजकत्वादिति वाच्यं।
तद्रूपावच्छिन्नपक्षसाध्यहेतुकदोषलक्षणेति वेशनीयं॥ तथा चेति निर्वह्निः पर्वतो वह्निमानित्यत्र च पक्षतावच्छे
दकनिर्वह्नित्वविशिष्टपर्वते वह्निवैशिष्ट्यावगाहित्वमनुमितेर्न संभवति स्वविरोधिधर्मधर्मितावच्छेदककत्वात्मका
स्याहार्यज्ञानस्यानभ्युपगमात् पर्वतः पर्वतावृत्तिवह्निमानित्यत्र पर्वते पर्वतावृत्तित्वरूपसाध्यतावच्छेदकाव
च्छिन्नप्रकारकत्वमनुमितेर्न संभवति स्वस्मिन्स्वावृत्तित्वावच्छिन्नप्रकारकानाहार्यज्ञानस्याननुभविकत्वादेवं पर्व
तो वह्निमान्वह्निव्यभिचारिणश्चेत्यत्र वह्निव्यभिचारित्वरूपहेतुतावच्छेदकावच्छिन्ने वह्निव्याप्यत्ववैशिष्ट्यावगाहि राम॰
त्वमनुमितेर्न संभवति पूर्वोक्तयुक्तेः पर्वतो वह्निमान्पर्वतावृत्तेरित्यत्र पर्वते पर्वतावृत्तित्वरूपहेतुतावच्छेदकाव २४

च्छिन्नवैशिष्ट्यावगाहित्वं नानुमितेः संभवति उक्तयुक्तेरिति यथाविवक्षितानुमित्यप्रसिद्धिप्रयोजकभेदेन नानास्थलेऽव्या
प्तिकथनं तत्र कोपि हेत्वाभासः स्यादिति तथा चापार्थकत्वरूपनिग्रहस्थानस्य तेन प्रयोक्तुर्निग्रहोपपत्त्या वस्तुतोनिर्वह्निते
न पर्वते वह्निः साधने धूमो दुष्ट इत्यादिव्यवहारो दुरुपपाद इति भावः तादृशानुमितेः तथाविवक्षितानुमितेरप्रसिद्धे
त्वादिति स्वाहार्यपरोक्षज्ञानानुपगमादिति भावः यद्विषयकनिश्चयस्येति। यद्रूपावच्छिन्नविषयकनिश्चयस्येत्यर्थः
उत्तरपदस्य उत्तरकालीनार्थकतया तदुत्तरमिति तादृशस्यानुमितिरूपक्रियाविशेषणत्वमतो द्वितीयाविभक्
च त्यैतादृशज्ञानरूपक्रियाविशेषणत्वं बोधितं ज्ञानपदमपि सार्थकं तत्पदं च तादृशनिश्चयपरामर्शकं उत्तरपदं व्याप्य
वहितोत्तरार्थकं कालाध्वनोरत्यन्तसंयोगे इत्यनेन द्वितीयाधिकरणे उत्तरपदस्योत्तरकालपरत्वादिति तु न युक्तं व्यापक
तार्थकत्वात् तत्संयोगस्य प्रकृतेऽविवक्षितत्वात् अनुमितौ अनुमितिसामान्ये द्वयोर्व्यतिरेक इति संबंधः तत्त्वं तद्रूपा
द वच्छिन्नत्वं च तत्ज्ञानानंतरज्ञाननिष्ठतादृशोभयाभावे तज्ज्ञानीयाप्रामाण्यविरोधिविषयितायाः प्रयोजकत्वादिति

ग॰ष॰ २५ रोधिविषयितायां तादृशनिश्चयीयावच्छेदकत्वं स्वरूपकीर्तनमात्रं नतु लक्षणघटकं तथा च यद्रूपावच्छिन्नविषयकनि
श्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिविषयताप्रयुक्तोभयाभाववत्त्वं तादृशरूपावच्छिन्नत्वं दोषत्वमिति
समुदितार्थः । वन्ह्यभावविशिष्टह्रदत्वावच्छिन्नविषयकनिश्चयानन्तरं ह्रदो वन्हिव्याप्यधूमवांश्चेत्याकारकानुमि वन्हिमान्
तेः कदाचिदप्यनुत्पत्त्या घटाद्यनुमितय एव तादृशनिश्चयाव्यवहितोत्तरानुमितिसामान्यान्तर्गतास्तासु च ह्रदत्वा
दिविशिष्टयत्किंचिद्वन्हित्वावच्छिन्नवैशिष्ट्यावगाहित्वं वन्हित्वावच्छिन्नवन्हिव्याप्तिविशिष्टधूमत्वावच्छिन्नवैशिष्ट्या
वगाहित्वं चेत्युभयाभाववत्त्वमक्षतमेव तत्र तादृशनिश्चयीयविरोधिविषयिताप्रयुक्तत्वमपि स्वनिष्ठप्रतिबन्धकता
वच्छेदकधर्मस्य सामानाधिकरण्येन ज्ञाननिष्ठप्रतिबध्यतावच्छेदकधर्माभावप्रयोजकत्वात् ह्रदत्वादिविशिष्टविशेष्यक
त्वावच्छिन्नवन्हित्वविशिष्टप्रकारताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूताया ह्रदत्वा राम॰
वच्छिन्नविशेष्यकत्वावच्छिन्नवन्हित्वावच्छिन्नाभावीयप्रकारितायास्तादृशवन्हित्वविशिष्टप्रकारकत्वघटितोभयाभा २५

वेतयात्वात् ॥ नच तादृशविशिष्टप्रकारकत्वमात्रं न विपरीतनिश्चयप्रतिबध्यतावच्छेदकं अपितु तद्विशेषितानाहार्य
ज्ञानत्वं तत्कथं तत्प्रकारकत्वाभावस्य तयादिव विरोधिविषयिताप्रयुक्तत्वमिति वाच्यं विशिष्टाभावे प्रयोजकस्य वि
शेष्यवन्निष्ठविशेषणाभावप्रयोजकत्वात् नाहार्यज्ञानत्वाद्याश्रयानुमित्यादिनिष्ठतादृशविशिष्टप्रकारकत्वाभा
वस्य विरोधिविषयिताप्रयुक्तत्वाक्षतेरिति ह्रदो वन्हिमान् धूमादित्यादौ वन्ह्यभावादिविशिष्टह्रदत्वाद्यवगाहित्वे लक्षणा
समन्वयः यद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापको विरोधिविषयिताप्रयुक्तो व्यापकत्वविशिष्टसंयोगसं
सर्गकवन्हिप्रकारकत्वघटितोभयाभावस्तत्त्वं तदवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीयं हेत्वाभासलक्षणं · व्यापकत्वा
द्यविशेषितधारणमेकं लक्षणं तु न संभवति · अथ संयोगसंसर्गकवन्हिप्रकारकत्वघटितोभयाभावघटितं सामाना
धिकरण्येन साध्यसिद्धिस्थलीयं लक्षणं · उभयसाधारणं दकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन बाधाव्याप्तेः · सा
मानाधिकरण्येन साध्यसिद्धौ सामानाधिकरण्येन बाधातिव्याप्तेर्वा प्रसंगात् · निर्वन्हिपर्वतो वन्हिमानित्यादौ तादृश

धारणमेकंलक्षणंतुनसंभवतिअवर

ग०ध०
२६

नुमितेरप्रसिद्धावपि वह्निमत्पर्वतादिरूपाश्रयासिध्यादिविषयकनिश्चयानंतरमप्रसिद्धघटाद्यनुमितिषु तत्रतत्रप्रसिद्धप
क्षतावच्छेदकविशिष्टविषयकत्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रकारकत्वघटितोभयाभाववत्त्वमक्षतमेवेति त
त्र लक्षणसमन्वयः। न चाहार्यज्ञानमात्रप्रसिद्धस्य निर्वह्निपर्वत इत्यवच्छिन्नविशेष्यकवह्निप्रकारकज्ञानत्वस्य वि ता
रोधिविषयकज्ञानप्रतिबध्यतानवच्छेदकतया तादृशधर्मावच्छिन्नवन्न्यादिप्रकारकत्वस्याभावे विरोधिविषयिता
प्रयुक्तत्वमप्रामाणिकमिति वाच्यं। तादृशज्ञानत्वस्य प्रतिबध्यतानवच्छेदकत्वेपि तद्व्यापकस्य पर्वतत्वावच्छिन्नव
ह्नित्वावच्छिन्नाभावप्रकारकज्ञानत्वस्यैव वह्निविशिष्टपर्वतविषयकनिश्चयप्रतिबध्यतावच्छेदकतया व्यापकाभावप्रयो
जकस्य सुतरां व्याप्याभावप्रयोजकतया तादृशविशिष्टविशेष्यकत्वावच्छिन्नवन्न्यादिप्रकारकत्वाभावस्य तादृशदोष
विषयिताप्रयुक्तत्वस्यावश्यकत्वात्। न च विरोधिज्ञानासत्त्वेपि निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानस्यानाहार्यस्यानु राम०
ग्य त्पत्त्यादृष्ट्यादिघटिततादृशानाहार्यज्ञानसामग्र्यभावस्यैव निर्वह्निविशिष्टेव ह्न्यादिवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वे २६

त्वेदि॰

नं तु विरोधिविषयत्वस्य किंचिदप्यकृतसत्त्वादिति वाच्यं। यथाभावाधिकरणतायामेव विरोधिविषयिताप्रयुक्तत्वस्यानिवेशेन त
पाश्रयविकरणतानां चाभावाभेदेप्यधिकरणभेदेन भिन्नतया विरोधिज्ञानानंतरोत्पन्नज्ञाने तादृशवैशिष्ट्यावगाहित्वाभा
वाधिकरणतायां तं विनिगमनाविरहेण पूर्वज्ञानीयविरोधिविषयताया अपि प्रयोजकत्वात्। यद्विषयताप्रयुक्ते ज्ञा
दृशोभयाभाववत्त्वमित्येतावन्मात्रे कृते हृदो वन्ह्यभाववानित्यादिज्ञानीयवन्ह्यभावादिविशिष्टहृदादिविषयितायां दुरंत द
नः पातिवन्ह्यभाववत्त्वादिविशिष्टविषयताया अपि प्रतिबंधकताघटककोटिप्रविष्टतया प्रतिबध्यतावच्छेदकस्य हृदत्वादि
विशिष्टे वन्ह्यादिवैशिष्ट्यावगाहित्वस्याविरहप्रयोजकतया बाधाघेकदेशे वन्ह्यभावादिरूपविशिष्टेप्यतिव्याप्तिरिति यद्विष
यकनिश्चयात्र वह्नितो जरानुमितिसामान्यस्य विरोधिविषयिताप्रयुक्तोभयाभाववत्त्वमिति वैशिष्ट्यं। तत्र यादृशविशिष्टविष
यितासामान्यप्रयुक्तस्तादृशोभयाभाववत्त्वमित्येव सम्यक्। हृदत्वादिविशिष्टविषयितासामान्यं तन्निरूपितायां हृदत्वादिज्ञा
नीयविषयितायामुभयाभावप्रयोजकत्वासत्त्वादतिव्याप्तेरनवकाश इति वाच्यं। पाषाणमयो न वह्निमानित्यादिज्ञा

ग.ध.
२७

नविशिष्टस्यपर्वतःपाषाणमयइतिज्ञानस्यपर्वतोवह्निमानित्यादिज्ञानप्रतिबंधकत्वात्तथाज्ञानभेदेनविषयताभेदामा
नात्पाषाणमयत्वविशिष्टपर्वतादिविषयितासामान्यस्यैवउभयाभावप्रयोजकत्वात्पाषाणमयत्वविशिष्टपर्वतादावतिव्या
प्तेर्दुर्वारत्वात्।ह्रदोवह्न्यभाववानित्यादिह्रदादिविषयकनिश्चयोत्तरोत्पन्नघटानुमितौविरोधिविषयताप्रयुक्तोभयाभाव
सत्वात्केवलह्रदादावतिव्याप्तिरतःसामान्यपदंपूरितंतथासतिह्रदादिनिश्चयानंतरोत्पन्नानुमितिसामान्यान्तर्गतायांह्रद
दूत्यादिनिश्चयानंतरजातह्रदोवह्निमान्वह्निव्याप्यधूमवांश्चइत्याद्यनुमितौविरोधिविषयिताप्रयुक्ततादृशोभयाभाव
सत्वान्नातिव्याप्तिः।द्रव्यत्वादिनावह्न्यभावविशिष्टह्रदादिविषयकनिश्चयानंतरमुक्तसमूहालंबनानुमित्युत्पत्त्यातादृश
विशिष्टस्यापिदोषत्वानुपपत्तेरतोपत्यदंयद्रूपावच्छिन्नपरत्वयोपवर्णितंवह्न्यभावविशिष्टह्रदादिविषयकस्यह्रदोवह्नि
मान्वेतिज्ञानस्यानंतरंतादृशसमूहालंबनानुमित्युत्पत्तावपितद्दोषतादवस्थ्यमतोनिश्चयेति।अत्राहार्याप्रामाण्य रामः
ज्ञानानास्कंदितसंशयान्यज्ञानपरत्वेनाहार्यस्याप्रामाण्यज्ञानानास्कंदितस्यापिदोषविषयकनिश्चयस्यानंतरंतादृशानुमितेः २७

नं०

तावपिनक्षतिः।दोषविषयकनिश्चयनाशेसतितद्दृशानुमितेरुत्पत्तौतद्दोषाव्याप्तिरतोऽव्यवधाननिवेशः।दोषविषयकलौकिक
निश्चयाव्यवहितपूर्वमनुमित्युत्पत्तौतद्दोषःस्यादितिचेत्तत्सामानाधिकरण्यमनुमितौनिवेश्यमतःएकस्यबाधनिश्चया
नंतरमन्यस्यानुमित्युत्पत्तावपिनक्षतिः।बाधादिनिश्चयानंतरंपक्षतावच्छेदकावच्छिन्नेसाध्यतावच्छेदकावच्छिन्नसाध्या
दिप्रकारकस्याहार्यस्यलौकिकस्यचप्रत्यक्षस्योत्पत्त्यातादृशज्ञानसामान्यमुपेक्ष्यानुमितिसामान्यानिवेशः।यत्साध्यक
यत्पक्षकयद्धेतुकस्थलेतादृशदोषविषयकनिश्चयानंतरंकस्याप्यनुमितिर्नजातातत्रतादृशानुमितेरप्रसिद्ध्याऽव्या
प्तिरतोऽनुमितिस्थलेऽनाहार्यदोषविशेषाजन्यज्ञानंनिवेश्यकल्प्यंतस्मादत्रनाहार्येति।तथाचतादृशानुमित्यप्रसिद्धिर्य
त्रतत्रतथाविधमानसोत्पत्तीतध्यानादिकमादायैवलक्षणंसंगमनीयमितिभावः।बाधादिनिश्चयानंतरंश्चाहार्यसाध्यादि
प्रकारकप्रत्यक्षोत्पत्त्याऽत्रसंभवोऽव्याप्तिर्वेत्यतोऽत्रनाहार्येतिशंखोनपीतइत्यादिनिश्चयानंतरंशंखःपीतत्वादिप्रकारक
स्यदोषविशेषजन्यचाक्षुषादेरुत्पत्त्याशंखःपीतःशंखश्चादिन्यादिस्थलीयबाधादावव्याप्तिरतोमानसेति।मानसपदेदो

ग.४.
२८ज्ञान

षविशेषाज्ञानप्रज्ञानपरतेनतना हं गौरइत्यादिनिश्चयानंतरं मिथ्र्याज्ञानजन्यवासनादिरूपदोषविशेषजन्यस्यात्मविशेष्य
कगौरत्वादिप्रकारकमानसप्रत्यक्षस्य प्रसिद्ध हं गौरइत्याकारकत्वादित्यादिस्थलीयबाधादौ नाव्याप्तिः एतेन यादृशसाध्यप
क्षहेतुकस्थले यद्दोषविषयके निश्चयानंतरं विरोधिसामग्र्यादिवशेन मानसज्ञानं कदापि न जातं तत्राव्याप्तिरित्यपि नि
रस्तं तत्राप्यनुमितिरूपशाब्दबोधादिकमादाय लक्षणगमनसंभवात् पक्षतावच्छेदकेत्यादिदलद्वयनिवेशाव्याप्तिः
पूर्वोक्तरीत्या बोधाविरोधिविवक्षितत्वप्रयुक्तत्वनिवेशनप्रयोजनं स्वयमेव ह्यूहनीयं यत्र विषयविशेषसमूहालंबनज्ञा वाग्रे
नं न कस्यापि जातं तत्र पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्व विशिष्टसाध्यव्याप्तिविशिष्टहेतुवैशिष्ट्यावगा
हित्वाभावरूपविशिष्टाभावाप्रसिद्ध्याऽव्याप्तिरतो विशिष्टाभावमुपेक्ष्योभयाभाव निवेशः कृतः तादृशोभयाभावप्र
योजकविरोधिविषयितावत्त्वं यद्रूपविशिष्टविषयिताव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्य सम्यक्त्वेऽपि यत्संनिवेशेन राम०
वैयर्थ्यंभावयदितितन्नतु कांचनमयः पर्वतो वह्निमान्धूमादित्यादौ पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्ध्याविशिष्टपक्षे २८

विशिष्टसाध्यादिवैशिष्ट्यावगाहित्वाप्रसिद्धिरित्याश्रयासिद्ध्यादावव्याप्तिरित्यत आह पक्षतावच्छेदकेति॥ आश्रयादिप
दात्साध्यतावच्छेदकवैशिष्ट्यादिपरिग्रहः वैज्ञानिकमिति। तत्प्रकारेणाज्ञायमानत्वरूपमित्यर्थः तथा च पर्वतादेः कां
चनमयत्वादिवैशिष्ट्यस्य वास्तविकस्य विरहेऽपि तेन रूपेणाज्ञायमानत्वमादाय लक्षणसमन्वय इति भावः नच हृदोन
वह्निमानित्यादिनिश्चयानंतरं जायमाने हृदो द्रव्यं जलमयं वह्निमांश्चेत्याकारकसमूहालंबने हृदत्वादिनाज्ञायमाने वह्न्या निसाध्या
व दिवैशिष्ट्यावगाहित्वसत्त्वादसंभव इति वाच्यं पक्षतावच्छेदकावच्छिन्नायाः पक्षनिष्ठविशेष्यतायाः निरूपितायाः साध्यता
वच्छेदकावच्छिन्नसाध्यप्रकारतायाः साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितव्याप्यत्वप्रकारतानिरूपितहेतु
तावच्छेदकावच्छिन्नहेतुप्रकारतानां प्रतियोगितयोरवगाहित्वं तद्रूपेण विवक्षणात् विशिष्टविषयाप्रसिद्धावपि पर्वतो घ
टो कांचनमयत्वावगाहिप्रमाविषयतायाः व्यधिकरणया कांचनमयत्वावच्छिन्नायाः प्रसिद्ध्या लक्षणसमन्वयात् सा
प्रकारतास्थाने च निरूप्यनिरूपकभावापन्नं व्याप्तिघटकत्वं तत्तदार्थप्रकारतानिवेशने। यातेन धूमवान्वह्नेरित्यादौ

ग.च.
२९

वह्निव्यापकधूमसमानाधिकरणरूपव्याप्तेरप्रसिद्धावपिनक्षतिः।नन्वत्रव्याप्तिपदेनान्वयव्याप्तिर्विवक्ष्यतेतदाव्यतिरेकव्या
प्तिज्ञानविरोधिनिःसाध्यादिनिष्ठाभावप्रतियोगित्वादिरूपन्तूपसंहारित्वेऽव्याप्तिस्तादृशज्ञानस्यान्वयव्याप्तिज्ञानविरो
धित्वाद्व्यतिरेकव्याप्तिविवक्षणेचहेतुनिष्ठसाध्याभाववद्वृत्तित्वसाध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रति
ज योगितावच्छेदकत्वादावव्याप्तिस्तज्ज्ञानस्यव्याप्त्यभावाच्छन्नवगाहित्वयाव्यतिरेकव्याप्तिज्ञानविरोधित्वेमानाभावादतआ
हव्याप्तिश्चेति अन्वयतः अन्वयनिरूपिताप्रकृतहेतुनिष्ठाप्रकृतसाध्यनिरूपितेतियावत्।साचातंतान्योन्याभावभे
देनभिन्नाश्रयव्यभिचरितसमानाधिकरणरूपनानाविधैवव्याप्त्यात्मतोऽन्यतमाभावादिगर्भव्याप्तिज्ञानेऽत्रन्योन्या
भावादिगर्भव्यभिचारज्ञानस्यव्यापकताज्ञानेसाध्याभाववद्वृत्तित्वादिज्ञानस्यग्राह्याभावोनवगाहित्वेनऽविरोधित्वेपि
नक्षतिः।व्यतिरेकतः व्यतिरेकनिरूपितासाध्याभावव्यापकीभूताभावप्रतियोगित्वरूपायाव्याप्तेर्व्याप्तिपदेनविवक्षणी राम०
द यत्वाच्चतत्रव्याप्तिप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताप्रतियोगित्वकूटाभावेनिवेशनीयाइतिभा २९

वः।ननुनिर्वह्निःपर्वतोवह्निमानित्यादौपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमि
तिकथंलक्षणसमन्वयइत्यतआहतादृशावगाहित्वप्रसिद्धिरिति।व्याहार्यज्ञानएवेतिनिर्वह्नित्वविशिष्टेवह्निप्रत्य पर्वते
क्षज्ञापकताभिन्नप्रकारकेऽप्यज्ञानप्रत्यक्षएवेत्यर्थः।विरोधिविषयताप्रयुक्तत्वनिवेशप्रयोजनमाहएवंचेतिविरोधि
विषयताप्रयुक्तत्वनिवेशनेनेत्यर्थः।नक्षतिः नर्निर्वह्निःपर्वतोवह्निमानित्यादौघटादावव्याप्तिःतस्यघटादिनिश्चय
क स्यविरोध्यविषयत्वाच्चतस्यानंतरानुमितिसामान्यनिष्ठतादृशोभयाभावप्रयोजकविरोधिविषयताकत्वविरहात्वावह्नि
मत्पर्वतादिविषयकसमूहालंबनात्मकघटादिनिश्चयानंतरंजातज्ञाननिष्ठतादृशोभयाभाववत्त्वस्यतज्ज्ञानीयविरो ज
धिविषयताप्रयुक्तत्वेपिघटादिनिश्चयाव्यवहितोत्तरानुमितिसामान्यांतर्गतसमूहालंबनात्मकघटादिनिश्चयाव्य
वहितोत्तरानुमितौविरोधिविषयताप्रयुक्तोभयाभाववत्त्वविरहान्नातिव्याप्तिरितिभावः।प्रयोज्यप्रयोजकभावश्चानु
भवसिद्धः स्वरूपसंबंधविशेषः विरोधिपदप्रयोजनमाहएवमितिअननुमितावपीतिनक्षतिःतस्यविरोध्यविषयकत्वा

ग॰ पं॰ ३०

द्विरूपतुष्टयत्वेन क्षतिः न साध्यवत्पक्षेऽतिव्याप्तिः विरोधिविषयतापदेन वा दृशोभयाभावप्रतियोगितावच्छेदककोटौ
यद्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नाभाववत्त्वव्याप्या
न्यतरविषयता वा साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयतान्यविषयतया वा वि
वक्षितत्वादिति भावः न च सिसाधयिषाशून्यतायां साध्यनिश्चयानन्तरं समूहालम्बनानुमितौ तादृशोभयाभावसत्त्वा
त् सिद्धिविषयेऽतिप्रसंग एव नास्ति एवं पक्षे साध्यनिश्चयोत्तरं तदतिरिक्तविषयकसाध्यविधेयकानुमितेरनुत्पा
देपि पक्षांशे साध्यांशे वा अधिकावगाहिन्या अनुमितेः साध्यधर्मितावच्छेदकतापन्नपर्वतत्वावच्छिन्नधर्मिताका
न्यविधेयकानुमितेः साध्यावच्छिन्नपक्षविधेयकानुमितेश्चोत्पत्त्या तत्रोभयाभावसत्त्वादपि नातिप्रसंगप्रसक्तिरि
ति वाच्यं यत्र सिषाधयिषाविरहात् सिद्ध्युत्तरं तादृशानुमितिः कदाचिदपि न जाता तत्रैवातिव्याप्तिसंभवात् द्वितीयक
ल्पे विषयतामात्रं निवेश्यं न तु विरोधिविषयतापर्यन्तमित्याशयेनाह मानसज्ञानेति । साध्यनिश्चयस्येत्यादिं मेयत्त राम॰ ३०

विशिष्टव्यभिचारादिवारणाय यथाश्रुते विशिष्टान्तराघटितत्वनिवेशे उपदर्शितव्यभिचारघटितबाधाद्यव्याप्त्या वि
शिष्टान्तरविषयिताप्रयोज्यस्य विषयितामपेक्ष्य तादृशोभयाभावप्रयोजकाभावाधिकरणताकत्वरूपं तादृशविशि
ष्टानिवेश्यं प्रमेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्यायाउक्तोभयाभावप्रयोजकव्याप्त्यवगाहित्वाभाववत्ता
त्व याः शुद्धव्यभिचारादिविषयिताप्रयोज्यत्वे नियमेन न प्रमेयत्वविशिष्टव्यभिचारादौ विशिष्टान्तरविषयिताप्रयोज्य
त्वविषयिताप्रयोज्यनिरूपितोभयाभावप्रयोजकाभावाधिकरणताकत्वमिति नातिप्रसंगः उपदर्शितव्यभिचारघ
टितबाधादिविषयिताप्रयोज्यतायाः पक्षे साध्यावगाहित्वाद्यभावाधिकरणतायास्तद्घटकव्यभिचारादिविषयिताप्र
योज्यत्वेन न तत्संग्रहः न च विशिष्टपक्षे विशिष्टसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदिकायास्तादृशबाधादिविषयतायाः
पर्वतत्वव्यभिचारादिविषयिताया अपि तादृशबाधादिविषयताप्रयोज्यतया विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्यावगाहि
त्वाद्यभावाधिकरणतायाः प्रयोजकत्वात्तादृशबाधादेर्दुःसंग्रहत्वमिति वाच्यं ॥ यत्किंचिद्विशिष्टान्तरविषयितात्वव्यापक

ग.ध. ३२

रूपावच्छिन्नाप्रयोज्यत्वनिवेशे न तत्तत्संग्रहसंभवात् व्यभिचारादिविषयितायाः बाधविषयतांशः प्रतिविषयतामात्रवृत्तिस्वरूपेणैवो
पदर्शितसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदकत्वात् नैवरूपेण तादृशसाध्याभावाग्रहत्वाविरहवत्ताप्रयोजकत्वात् तादृशस्य च
रूपस्य बाधादिविषयतांतःपातिव्यभिचारादिविषयतासाधारणस्य व्यभिचारादिरूपविशिष्टविषयतात्वव्यापकत्वात्
तद्व्यापकरूपावच्छिन्नाप्रयोज्यत्वस्योक्तबाधादिविषयताप्रयोज्यस्य उक्तसाध्याभावाग्रहत्वाभाववत्तायामक्षतत्वात् मेयत्वविशि
ष्टव्यभिचारादिविषयतायां येन रूपेणाग्रहसाध्यादिग्रहप्रतिबंधकतावच्छेदकत्वं तद्रूपेणानिरुक्तविषयतात्वव्यापकेन मेयत्ववि
शिष्टव्यभिचारादिविषयतांतःपातिव्यभिचारादिविषयतायाः मेयत्वविशिष्टव्यभिचारादिविषयताप्रयोज्यस्य व्याप्त्याद्यवगाहित्वा
भाववत्तायां नियमतः प्रयोजकत्वान्नातिप्रसंग इत्याशयः बाधसत्प्रतिपक्षादिविषयकज्ञानस्यानात्मविधबाधादिविषयकज्ञा
नस्य वानंतरं ज्ञातायां घस्यानुमितौ बाधादिविषयताप्रयोज्यप्राप्याद्यभावाधिकरणतात्वस्याविशिष्टांतरविषयताप्रयोज्यत्वेपि स्वपू राम. ३२
र्ववृत्तिज्ञानीयविरोधिविषयतायाः एवस्वनिष्ठप्रतिबध्यतावच्छेदकाभावाधिकरणताप्रयोजकत्वात् ॥ एकैकविषयबाधादिमात्रज्ञा

नानंतरज्ञातज्ञानीयात् तद्बाधादिविषयताप्रयोज्याद्यवगाहित्वाभावाधिकरणतात्वस्याविशिष्टांतरविषयित्वाप्रयोज्यत्वात् बाधादौ
लक्षणसमन्वयः। व्यभिचारघटितबाधादिविषयताप्रयोज्यापादीधितिकारोक्तेऽभ्याभावाधिकरणतायां व्याप्त्याद्यवगाहित्ववि
रहप्रयोज्यत्वे तत्र यत्किंचिद्विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नतादृशबाधादिविषयतांतःपातिव्यभिचारादिविषयता
प्रयोज्यत्वनियमात्तत्संग्रहाय तादृशेऽभ्याभावप्रयोजकाभावाधिकरणतापर्यंतनिवेशः। तथा सति दर्शितोऽभ्याभावाधि
करणतायाः उक्तरूपावच्छिन्नव्यभिचारादिविषयताप्रयोज्यत्वनियमेऽपि तादृशोऽभ्याभावप्रयोजकसाध्यादिमत्तावगाहित्वा
भावाधिकरणतायाः उक्तरूपावच्छिन्नव्यभिचारादिविषयित्वाप्रयोज्यत्वेन तादृशबाधादेः संग्रहासंभवाद्बाधादिविषयताप्रयोज्यस्य पि
साध्यादिमत्तावगाहित्वाविरहस्य सत्प्रतिपक्षादिरूपविशिष्टांतरविषयताप्रयोज्यत्वनियमादसंभवस्यादितु अभ्याभावप्रयो
जकाभावे विशिष्टांतरविषयताप्रयोज्यत्वमविवक्षणात् तादृशाभावाधिकरणतापर्यंतनिवेशः इत्योति अधिकरणताया अ स
धिकरणभेदेनाभिन्नतया पूर्ववर्तिनिष्ठप्रतिबंधकतावच्छेदकधर्मवैशिष्ट्यतदुत्तरोत्पन्ननिष्ठप्रतिबध्यतावच्छेदकधर्माभावाधिकर

रा०वि० ३२ रामेदेनभिन्नत्वतयापूर्ववर्त्तिनिष्ठप्रतिबंधकतावच्छेदकधर्मस्यैवतदुत्तरोत्पन्ननिष्ठप्रतिबध्यतावच्छेदकधर्माभावाधिक
रणताप्रयोजकत्वेनैवबाधादिनिश्चयोत्तरोत्पन्नानुमितिनिष्ठसाध्यादिमत्तावगाहित्वाभावाधिकरणताथंसत्वेलिप
क्षान्याद्दृशबाधादिविषयतायाअप्रयोजकत्वेनसामंजस्यात्ः अथैताद्दृशेभयाभावघटितलक्षणाकूरणेपिकेव
लनिर्वह्नित्वादिपक्षतावच्छेदककवह्न्यादिसाध्यकस्थलीयनिर्वह्निनिष्ठवह्न्यभाववत्त्वबाधादिदोषेव्याप्तिः·तादृश
बाधादिस्थलीयवह्न्यभावरूपबाधज्ञानस्याप्रतिबंधकतयातदीयविषयितायाप्रतिबंधकतानवच्छेदकत्वपातयावि
धोभयाभावाप्रयोजकत्वात्तस्यदोषत्वानुपगमेवक्तादृशहेतौदुष्टत्वव्यवहारानुपपत्तेः दृष्टापत्तौचनिर्वह्निःपर्वतो
त्र वह्निमानित्यादावपितत्संभवेनैवताद्दृशाभयासवैकल्योक्त्तेनचतत्राभाववान्वह्निमानितिनाहार्यज्ञानस्याप्रसि
द्ध्यातत्प्रतिबंधकीभूतस्याभाववान्निर्वह्निरित्यादिज्ञानविषयएवदोषइतिवाच्यंअभाववत्त्वसामानाधिकरणोप राम०
ननिर्वह्नित्वग्रहस्यताद्दृशवह्निमत्त्वग्रहाविरोधित्वात्अभाववत्त्वावच्छेदेनवह्न्यादिमत्त्वाग्रहविरोधित्वेपिताद्दृशव ३२

न्ह्यादिमत्तावगाहित्वस्यवन्ह्यभावादिमत्त्वरूपपक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वाव्यापकतयातदवच्छिन्न
प्रतिबंधकतावच्छेदकविषयितायास्तयाविधोभयाभावप्रयोजकत्वात्तद्विषयस्यदोषत्वानुपपत्तेः।अभाववत्त्वा
वच्छेदेननिर्वह्नित्वग्रहस्यभ्रमरूपतयातद्विषयविशिष्टस्यैवाप्रसिद्धेः एवंवह्निमान्निर्वह्निरित्यादिस्थलीयदोषे
नितरामव्याप्तिः वह्निमन्निष्ठवह्निमत्त्वादेरेवतत्रदोषत्वसंभवात्तद्विषयकज्ञानस्यचक्कचिदपिप्रतिबंधकत्वायोगा
यत्र त् एवंनिर्वह्निःपर्वतोवह्निमानित्यादौपर्वतत्वादिसामानाधिकरण्येनवन्ह्यभावादिमत्त्वस्यपक्षतावच्छेदकघटक
तातत्रपर्वतत्वादिसामानाधिकरण्येनवन्ह्यादिमत्त्वंनदोषः विशिष्टपक्षग्रहाविरोधित्वेनाश्रयासिध्यादिरूप
तानुपपत्तेः उक्तरीत्यैतल्लक्षणानाक्रांतत्वाच्चपर्वतत्वावच्छेदेनवह्न्यादिमत्त्वप्रसिद्धंवह्निमत्त्वपर्वतोदेरपिसत्त्वात् चा
नापिपर्वतत्वादिसामानाधिकरण्येननिर्वह्निपर्वतत्वाद्यवच्छेदेनवावन्ह्यभावादिमत्त्वरूपस्यपक्षतावच्छेदकविशि
ष्टसाध्यवैशिष्ट्यावगाहित्वव्यापकविषयितावद्धर्मावच्छिन्नाप्रतिबंधकतयातत्रलक्षणागमनायोगात्।नापि
बाधादिःतच्चज्ञानं

उभयाभावप्रतियोगितावच्छेदककोटीयद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छि
न्नविशेष्यकतद्रूपावच्छिन्नाभाववत्त्वघटितान्यतरप्रकारकत्वस्यैव विरोधिविषयत्वार्थकतया

ग॰ध॰ पर्वतत्वावच्छेदेन वन्ह्यभावादिमत्त्वस्याप्रसिद्धत्वादिति तन्नैकोपि दोषस्यात्त्वयन्तु प्रयुक्तत्वं व्यापकतायां यद्विषयकनिश्चय
३२ निष्ठविरोधिविषयिताया उभयाभावव्याप्यत्वं च स्वाश्रयतादृशनिश्चयाव्यवहितोत्तरानुमितित्वसंबंधेन तादृशसं
तावि बंधलाभायैव तदुत्तरमनुमित्यंकं एवं च विरोधिविषयकयद्विषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकत्वादृ
शोभयाभावइति पर्यवसितं एवं च निर्वन्हिर्वन्हिमानित्यादिस्थलीयबाधादेर्विषयितायास्तद्रूपसंबंधरूपोभयाभा
वप्रयोजकत्वासंभवेपि तत्रत्वस्थलसु समन्वयमेव तादृशप्रयोजकत्वस्यानिवेशात् न चैवं तत्र वस्तुमात्रेऽतिव्या
प्तिर्दुर्वारैव तादृशोभयाभावस्य विरोधिविषयकसमूहालंबनरूपघटादिविषयकनिश्चयाव्यवहितोत्तरानुमिति
त्वव्यापकतायास्सत्त्वादिति वाच्यं विरोधिविषयितानतिरिक्तवृत्तियद्विषयतानाश्रयनिश्चयस्य निश्चयां
तेन विवक्षितत्वात् घटादिविषयितायास्तत्र निरुक्तविरोधिविषयतानतिरिक्तवृत्तित्वविरहात् न चैवं विरोधिवि राम॰
षयितानतिरिक्तवृत्तिर्यदीयविषयिता तत्त्वमित्येतावतैव सामंजस्ये शेषवैयर्थ्यमिति वाच्यं यत्र पर्वतत्वादिसामा ३२

नाधिकरण्येन वन्ह्यादेः साध्यता तत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादिमत्त्वस्य विषयिता या निरुक्त
विरोधिविषयितानतिरिक्तवृत्तितया तत्रातिव्याप्तिवारकतया शेषसार्थक्यात् तदुपादाने तादृशवन्ह्यभावादिमत्त्ववि
षयनिश्चयानंतरं पर्वतत्वादिसामानाधिकरण्येन वन्ह्याद्यनुमित्युत्पत्त्या तादृशानुमितौ तया विषयोभयसत्त्वेनाति
व्याप्तेरवकाशादिति न तु यं निर्वन्हिः पर्वतो वन्हिमानित्यादौ यत्र पर्वतत्वादिसामानाधिकरण्येन वन्ह्यभावादेः
पक्षतावच्छेदकघटकतात्र पर्वतत्वसामानाधिकरण्येन वन्ह्यादिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वेनाश्रयासि
ध्यात्मकस्य हेत्वाभासांतरताभयेनासंभवद्दोषभावस्य निरुक्तविरोधिविषयतानतिरिक्तवृत्तिविषयिताकतया
तिव्याप्तेः तादृशोभयाभावप्रतियोगितावच्छेदकगर्भे यद्रूपविशिष्टे येन संबंधेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं
निविष्टं तत्तद्रूपावच्छिन्नविशेष्यकत्वं तत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्ननिरूपितप्रतिबंधकताव
च्छेदकत्वरूपे विरोधित्वस्य विषयतायां निवेशे तु शेषवैयर्थ्यं उक्तरीत्या निर्वन्हिर्वन्हिमानित्यादिस्थलीयदोषस्य

ग॰ध॰ व्याप्तिग्रहानुपपन्नतावच्छेदकविशिष्टे निरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयितैव विरोधिविषयिताप
३४ य दार्थः। तथा च वह्निनिरूपिततादृशविषयताशालिनिश्चयोत्तरानुमितित्वव्यापकः उभयाभाववत्त्वानुमितिसमुदाया
र्थः निश्चयत्वं च विशेषणताविशेष्यतावच्छेदकभावानापन्नवैरोधिकोटिद्वयप्रकारकएकधर्मिविशेष्यकज्ञाना
न्यज्ञानत्वं कोटिद्वये विशेषणताविशेष्यतावच्छेदकभावानापन्नत्वनिवेशान्निर्वह्निः पर्वतो वह्निमानित्यादौ प
क्षतावच्छेदकविशिष्टे साध्यादिवैशिष्ट्यग्रहस्यैकत्र द्विरोधिद्वयप्रकारकत्वनियमेऽपि तादृशवैशिष्ट्यावगाहिनि
श्चयाप्रसिद्धिः यदीयविषयिताशालितादृशनिश्चयावृत्तिस्तत्त्वमित्येतावन्निरुक्ते ह्रदो वह्निव्याप्यधूमवान् इत्यादौ ह्रदादि
निष्ठवह्न्यभावादिमत्त्वेऽतिव्याप्तिः वह्न्यादिव्याप्यवत्तानिश्चयस्यापि वह्न्यादिनिश्चयवत्कार्यसहभावेन वह्न्य
भावादिग्रहविरोधितावह्न्यभावादिमत्ताविषयितायास्तादृशनिश्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति तदपि राम॰
न वह्निव्याप्यवान्वह्निव्याप्यव्याप्यवांश्च ह्रदो वह्न्यभाववानित्येतादृशाहार्यज्ञानोपगमेन वह्न्यभावादिमत्त्ववि ३४

षयितायाः वह्निव्याप्यादिमत्त्वनिश्चयावृत्तितया उक्तातिव्याप्त्यनवकाशेन शेषसार्थक्यानुपपत्तेः वह्निव्याप्यवान्निर्वह्नि
र्वह्निमानित्याहार्यज्ञानोपगमे च निर्वह्निर्वह्निमानित्यादिस्थलीयसत्त्वं वह्निमान्वह्निव्याप्यवांश्च ह्रदो वह्न्य
भाववानित्येतादृशाहार्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदो वह्निमानित्यादिस्थलीयबाधादिविषयितासत्त्वेनासं
भवप्रसंगाच्च। वह्न्यादिरूपधर्मितावच्छेदकानवच्छिन्नवह्न्यभावादिविशेषितह्रदादिनिरूपितविषयितायाः
साध्यादिनिश्चयावृत्तित्वेऽपि घटादिनिरूपितविषयितायाश्चापि दोषविषयितावच्छिन्नाया विषयितायाः साध्यादि
निश्चयावृत्तितया घटादावुदासीनेऽनुमितिव्याप्तिवारणाय यादृशविशिष्टविषयितासामान्यं तादृशनिश्चयावृत्तित्वा
दृशविशिष्टनिरूपितविषयितायाः सर्वा विरोधिविषयितेत्यनेन न विवक्षणीयं तथा च प्रतिकारासामान्यवृत्तितदीय य
विषयितासामान्यं तादृशनिश्चयावृत्तित्वं तदीयविषयिताया विवक्षणेन निर्वाहेऽपि विरोधिविषयद्विषयिताशालिनिश्चयोत्तरा
नुमितिसामान्ये द्वयोर्व्यतिरेक इत्यनभिधाय यद्विषयकनिश्चयस्येत्यादिवैकाभिधानस्य संपर्यकारीतिविरुद्धत्वात् रीय

ग·ब·
३५

रातेनविषयितायास्तुभयाभावप्रयोजकत्वेनादृशोभयाभावप्रतियोगितावच्छेदकंयद्रूपविशिष्टेयेनसंबंधेनयद्रूपावच्छिन्नविशिष्टा
वगाहित्वघटितंतद्रूपावच्छिन्नविशेष्यकत्वतत्संसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वेनानाहार्यालौकिकसंनि
कर्षाजन्यज्ञानत्वेनवावच्छिन्नायाप्रतिबध्यतायानिरूपितप्रतिबंधकतावच्छेदकत्वंएवंचयद्रूपविशिष्टविषयितानिरुक्त
तथाविधोभयाभावप्रयोजकतापर्यस्ताद्दृशत्वमेवलक्षणंविषयितादौविरोधित्वादिकपरंतुस्वरूपाख्यानमात्रमिति
प्रलपितमपास्तंनादेयोंनिर्वह्निमानित्यादिस्थलीयदोषस्योक्तयुक्त्यादुःसंग्रहत्वात्।अत्रकेचित्·कश्चिदित्यंताधिमकल्प
इवात्रापिकल्पेदीधितिकृतानिर्भरःनिर्वह्निर्वह्निमानित्यादिस्थलीयदोषासंग्रहेणास्वरसेनाधिमकल्पेकेचिदित्यनेनेत्य स
त्रापिकल्पेवदंतीत्यनेनसूचितत्वात्।निर्भरस्तुकेचिदित्यादिकल्पएवस्वरसएवतत्रप्रकर्षबोधनायप्राहुरित्युक्तमिति।प
रेतुघटाभावादिधर्मितावच्छेदककत्वन्वयादिज्ञानंप्रतितद्धर्मितावच्छेदककत्वन्वयभावादिमत्ताज्ञानप्रतिबंधकत्वंकल्प रा५०
नीयेधर्मितावच्छेदकभेदेनतदेकल्पनमयुक्तंलाघवानुरोधेनधर्मितावच्छेदकधर्मानंतिवेश्यनाहार्यवत्त्वादिविशिष्टबुद्धि ३५

त्ववत्त्वभावादिनिश्चयत्वाभ्यांसमानधर्मितावच्छेदकत्वप्रत्यासत्त्यैवप्रतिबध्यप्रतिबंधकभावःकल्प्यते।एवंचतद्देशनि
ष्ठस्यपूर्ववर्तिप्रतिबंधकनिरूपितप्रतिबंधकतावच्छेदकसंबंधस्यउत्तरवर्तिनिष्ठप्रतिबध्यतावच्छेदकसंबंधेनतद्देशासंबं
धित्वंप्रतिप्रयोजकंतथाचत्त्वभावादिप्रकारकज्ञानीयधर्मितावच्छेदकतास्वविषयतायास्तुउत्तरोत्पन्नानाहार्यघ
दिप्रकारकज्ञानस्यवह्न्यभावादिधर्मितावच्छेदककत्वविरहप्रयोजकत्वात्तद्वह्न्यभावादिविशिष्टवत्त्वादिवैशिष्ट्यावगा
हित्वविरहस्यवत्त्वभावादिधर्मितावच्छेदककत्वभावादिप्रकारकनिश्चयीयविषयिताप्रयुक्तत्वमस्त्वेवेतितादृ
शनिश्चयविषयस्यदोषत्वमप्याहतमेव।नचधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याविपरीतज्ञानस्यप्रतिबंधकत्वेनिर्वह्निवि
वह्नि शेष्यकवह्निज्ञानंजायतामित्याकारकेच्छाजन्यस्यनिर्वह्निर्मान्घटाभाववांश्चवह्निमानित्याकारकाहार्यज्ञानस्यविप
रीतज्ञानप्रतिबध्यतावच्छेदकतानाक्रांततयाघटाभाववान्वह्न्यभाववानित्यादिनिश्चयकालेतथाविधेच्छासत्त्वेघटाभा
वविशिष्टविशेष्यकवह्निज्ञानंजायतामित्याकारकेच्छाविनैवतादृशज्ञानापत्तिरितिवाच्यं।।यतःसामान्यतोवह्न्यादि

ग॰ प॰ ज्ञानेच्छाविशिष्टान्यत्वरूपमनाहार्यत्वं न प्रतिबध्यतावच्छेदककोटौ निवेशनीयं । किं त्वाहार्यज्ञानोपपत्त्यर्थं विशेष्यतानि
३६ ष्ठं यत्तद्विशेष्यतावच्छेदकत्वं तदवच्छेदकतावच्छेदकत्वसंबंधावच्छिन्नप्रतियोगिताकवन्नत्वादिज्ञानेच्छाविरहस्य वास्त
व वह्नित्वप्रकारकक्षणावच्छिन्नाधिकरणतात्तद्विशिष्टधर्मितावच्छेदकताया एव प्रतिबध्यत्वावच्छेदकसंबंधत्वमुपेय
तेनादृशेच्छा : विरहस्य प्रतिबंधकविघटकत्वमेव वा विशेषणताविशेष्यधर्मितावच्छेदकतासंबंधवृत्तित्वसामान्याधिक
रणसंबंधेनोपगंतव्यं उक्तस्थले च घटाभावादौ तादृशेच्छाविरहस्य सत्त्वान्नोक्तापत्तिः । अन्यत्रासिकमनुसंधेयमिति
वदंति निर्वह्निः पर्वतो वह्निमानित्यादिस्थलीयदोषसाधारणाय प्रकारैक्ये तु देशा लक्षणं घटयितव्यं केषांचिन्मतमाह
तादृशपक्षश्रुतिपक्षतावच्छेदकविशिष्टपक्ष इत्यर्थः । तादृशसाध्येति । साध्यतावच्छेदकविशिष्टसाध्येत्यर्थः । तादृशहे
त्विति हेतुतावच्छेदकविशिष्टहेत्वित्यर्थः । ज्ञानस्याविरोधिविषयकं यद्विषयकं ज्ञानमिति येऽन्यज्ञानं ज्ञानसामान्ये त राम॰
न घटादिविषयकस्य कस्यचित्समूहालंबनस्य तादृशज्ञानविरोधिबाधादिविषयकत्वेपि नातिप्रसंगः । स्वावच्छिन्नवि ३६

षयकत्वव्यापकतादृशज्ञानविरोधिविषयिताकधर्मवत्त्वमिति फलितार्थः । अत्र च विषयितानिष्ठं स्वरूपसंबंधरूप
तादृशज्ञानविषयविषयकग्रहप्रतिबंधकतावच्छेदकत्वात्मकतादृशज्ञानविरोधित्वमेव निवेशनीयं न तु विषयनि
ष्ठं निर्वाच्यतादृशज्ञानविरोधित्वं तस्यैव लक्षणत्वसंभवे अत्र न शेषवैयर्थ्यप्रसंगात् अत्र च विषयनिष्ठस्य निर्वाच्य
तादृशज्ञानविरोधित्वस्यैतद्घटापेक्षया लघुत्वे यत्तदेवाह तादृशज्ञानविरोधित्वं वेति तादृशज्ञानविरोधित्वं यदि ताद
शज्ञानप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकधर्मवत्त्वं तदा पूर्वं निरुक्तरूपयाश्रुतार्थे एव पर्यवसानान्निर्वह्निः : मूला
पर्वतो वह्निमानित्यादिस्थलीयदोषाव्याप्तितादवस्थ्यमिति तन्निर्वक्ति तज्ज्ञानाविरोधित्वं चेति तद्विषयविषयकेति ।
तथा च निर्वह्निः पर्वतो वह्निमानित्यादौ तादृशज्ञानविरोधिज्ञानाप्रसिद्धावपि तद्विषयविषयकस्य निर्वह्निः पर्वत इ
त्यादिज्ञानस्य प्रतिबंधकं यद्वह्निमानित्यादिज्ञानं तद्विषयतामादायैव वह्निमत्पर्वतादिरूपतत्स्थलीयाश्रयासिद्ध्यादौ
लक्षणसमन्वयः । अथ घटत्ववद्भूतलादिरूपोदासीनपदार्थविषयकसमूहालंबनात्मकपक्षतावच्छेदकावच्छिन्नवि

ग०ध० शेष्यकसाध्यतद्व्याप्यहेतुमत्प्रकारकज्ञानविषयविषयकघटत्वद्रूतलादिज्ञानप्रतिबंधकज्ञानविषयपक्षाभाववत्त्वमतलादाववि
३७ व्याप्तिःनचपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकाव
च्छिन्नप्रकारकग्रहत्वव्यापकविषयिताघटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकसावच्छिन्नविषयि
ताकधर्मवत्त्वनिवेशान्नदोषःघटत्वद्रूतलादिविषयितायास्तादृशग्रहत्वाव्यापकत्वादितिवाच्यं।यतःपर्वतोवह्निम
त्वाद्यनवगाहिनोनिर्वह्निःपर्वतइत्यादिज्ञानस्ययावद्वह्निप्रकारकज्ञानानिरूपितानिर्वह्नित्वादिप्रकारितानिरूपितपर्वता
दिविषयितासंबंधानाहार्यत्वविशिष्टत्वयावद्वह्निमत्पर्वतइत्यादिज्ञानप्रतिबध्यतावच्छेदिकात्तस्याश्चनिर्वह्निःपर्वतोवह्निमा
नित्याद्याकारकाहार्यज्ञानसाधारणप्रमाणाभावात् स्वाहार्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धेर्विपरीत
नाज ज्ञानाभाववघटितायास्तादृशविषयिताप्रयोजकानाहार्यज्ञानसामग्र्याश्चाहार्यज्ञानेकत्वात्तादृशग्रहत्वव्यापकत्वेवह्नि राम०
मत्वादिप्रकारितानिरूपितातादृशपर्वतादिविषयितासाचनप्रतिबध्यतावच्छेदिकेतिनिर्वह्नित्वादिप्रकारितानिरूपितप ३७

र्वतादिविषयितात्वेननिर्वह्निःपर्वतइत्यादिज्ञानीयविषयितार्पितयाविषयग्रहत्वव्यापिकेतिचेन्नहिविषयितात्वादिनाघट
त्वद्रूतलादिविषयितानामर्पितव्यापकत्वपोउदासीनपदार्थवारणमशक्यंमेवं यद्रूपावच्छिन्नेयद्रूपावच्छिन्नप्रकारकत्वता
वच्छिन्नतादृशग्रहत्वव्यापकंतद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकता
वच्छेदकतावच्छिन्ननिरूपितविषयताकधर्मवत्त्वस्याविवक्षणीयतयासर्वसामंजस्यादितिदिक्।स्वतन्त्रचास्तरसस्तूचनापके
त्यादितिसत्वोक्तयुक्त्यानिर्वह्निर्वह्निमानित्यादिस्थलीयदोषासंग्रहेणान्नवधर्मितावच्छेदकत्वप्रमात्वावह्निप्रकारकज्ञानप्र
तिबन्धभावप्रकारकज्ञानस्यप्रतिबंधकतामतेनिर्वह्निर्वह्निमानितिप्रेतादृशज्ञानसमानविषयकानाहार्यवह्निमानित्याका
रकज्ञानप्रतिबंधकत्वाभावादायलक्षणासमन्वयःसंभवतीतिवाच्यंतादृशमतमाश्रयतोपर्वतोवह्निमानित्यादौबन्त्याभाववद्वृ
दादैर्दैष्यिताप्रसंगात्। यादृशेतिसर्वत्रयद्रूपावच्छिन्नार्थकंतावदन्यान्यत्वमितियत्रयादृशपक्षसाध्यहेतुकस्थलेयादृशदो
षज्ञानस्यप्रतिबध्यंज्ञानंप्रसिध्यतियथानिर्वह्निःपर्वतोवह्निमान्धूमवानित्यादौवह्निविशिष्टपर्वतादिरूपाश्रयासिद्ध्यादिरूप

ग॰ध॰ ३८ भावविशिष्टनिर्वन्हिपर्वतादिरूपस्वरूपासिध्यादीनां ज्ञानस्य तत्प्रतादृशदोषाणां प्रत्याभावत द्व्याप्यस्य च प्रत्येकं भेदेन विशेषणा
विशेष्यभावभेदेन च विभिन्नानामननुगतेन विशिष्टपक्षे विशिष्टसाधनवैशिष्ट्यग्रह विरोधित्वरूपासिद्धित्वादिने वतावद्रूपाणां
तद्घटकभेदप्रतियोगिविधया निवेशः। ननु वन्हिविशिष्टपर्वतत्वनिर्धूमत्वविशिष्टनिर्वन्हिपर्वतत्वादिना प्रयोजनविरहात्
तद्दृशदोषविषयकज्ञानस्यप्रतिबध्यज्ञानाप्रसिद्धेः यथा तत्स्थलीयदोषस्य निर्वन्हिर्वन्हिमानित्यादिस्थलीयस्य च बाधा
देर्ज्ञानस्य तादृशदोषाणामगत्या वन्ह्यभावविशिष्टनिर्वन्हित्वं वन्ह्यभावव्याप्यविशिष्टनिर्वन्हित्वं निर्वन्हिनिष्ठवन्ह्यभा
वव्याप्यत्वादिनाऽननुगतरूपेणैव निवेशः। अत्र च विशिष्टभिन्नभिन्नाच स्वस्य दृश्यविशेष्यसाधारणतया सर्वभावाव
दित्यादौ प्रत्याकाशाभावविशिष्टसर्वादिरूपबाधादिभिन्नत्वस्याप्रसिद्धतया च तत्तद्विशिष्टनिरूपितविषयितान्यतमविष
यितानिरूपकतावच्छेदकधर्मवत्त्वमेवाभिमतं अयं च प्रकारो यादृशपक्षसाध्यहेतुकस्थले तत्सत्त्वे तं वा नानुमितेरप्रसि राम॰
द्धिस्तत्रैवादरणीयः यत्र तु तत्प्रसिद्धिस्तत्र लाघवाद्यथाश्रुतमूलमप्यन्तरूपेणैव साधीयः। शाब्दाभेदस्यार्कि चित्करतायाः ३८

स्वयमेव वक्ष्यमाणत्वादित्यवधेयं। यत्र चाश्रयासिध्यादिरेकविध एव दोषः प्रतिबध्यज्ञानं च प्रसिद्धं महानसत्ववान् पर्वतो
वन्हिमान् धूमादित्यादौ तत्र विशिष्टपक्षग्रह विरोधित्वादिरूपाश्रयासिद्धित्वादेरेव दोषसामान्यलक्षणत्वमुचितं ननु महान
सत्वाद्यभावविशिष्टपर्वतत्वावच्छिन्नतादृशाभावव्याप्यविशिष्टपर्वतत्वावच्छिन्नादिभिन्नभिन्नत्वस्य निरुक्तसमूहा
लंबनानुमितिविरोधित्वस्य चैतेषां तादृशस्थलीयत्वेनाह। एकमात्रदोषस्थल इति एकविध एव यत्र दोषस्तद्विषयकज्ञानप्र
तिबध्यज्ञानं च प्रसिद्धं तादृशस्थल इत्यर्थः। तेन प्रत्याभावतद्व्याप्यभेदेन सर्वदोषाणां नानात्वसंभवात् एकमात्रदोषस्थ
द्वित्वेपि लस्याप्रसिद्धं न क्षतिः। तत्त्वं तादृशत्वं निरुक्ताश्रयासिद्धित्वादिकमित्यर्थः। इदमुपलक्षणं परामर्शविरोधिनो व्यभि
चारविरोधासिद्ध्यन्तत्रयो दोषाः। ननु बाधप्रतिरोधौ पर्वतो वन्हिमान् ह्रदत्वादित्यादौ तत्र परामर्शविरोधित्वमेव सामान्यलक्ष
णं यत्र च बाधप्रतिरोधासिद्ध्यो दोषाः। ननु व्यभिचारविरोधौ ह्रदो वन्हिमान् धूमात् ह्रदस्य कांचनमय वन्हिमान् धूमात् कांचनमय
ह्रदो वन्हिमान् धूमात् ह्रदो वन्हिमान् कांचनमयधूमादित्यादौ तत्र विशिष्टपक्षे विशिष्टसाध्यस्याभावपरैौ शिष्टावगाहिज्ञा

नंतद्धेराश्रित्वमेवतथाएवंयत्रव्यभिचारासिद्धी एवदोषौ कांचनमयः पर्वतो धूमवान्वन्हेरित्यादौ तत्र विशिष्टपक्षविष
यकव्याप्तिविशिष्टसाधनविशिष्टपक्षवृत्तित्वस्य कार्यकारणभावेनानुमितिप्रतिबन्धकत्वेऽपि विशिष्टत्वादिकं तथैतत्पविरोधं तन्नानुतत्तद्धर्मावच्छिन्नभिन्नभिन्नत्वरूपलक्षणघट
कतत्तद्धर्माणां भागासिद्धतया हेत्वाभाससाभान्येऽप्येतद्भेदानुमापकत्वेऽपि व्यभिचारवारकतयातदितरांशस्य वैय
र्थ्यमित्यतस्त्वाहुरसच्चेति। सचान्योन्याभावोऽतिरिक्त एवेति योजना सवत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदकूटावच्छि
न्नप्रतियोगिताकः अतिरिक्तस्तत्तद्धर्मातिरिक्तः तथाच धर्मिभेदान्न वैयर्थ्यं तत्तद्धर्मावच्छिन्नभेदमात्रावच्छिन्नप्रति
योगिकान्योन्याभावस्य स्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगितावच्छेदकतत्तद्धर्मस्वरूपत्वेऽपि तादृशभेदकू
टावच्छिन्नप्रतियोगिताकभेदत्वस्य नानाधर्मयुक्तत्वेनानपेक्ष्यात हि शिष्टस्यैकस्यैव भेदस्य तावत्त्वेन कल्पयितुं युक्तत्वादि
त्यभिप्रायः। एतच्च यथाश्रुताभिप्रायेण तत्तद्धर्मावच्छिन्नानिरूपितविषयितानां तत्तद्विषयितानां रूपकतावच्छेदकधर्म
वत्त्वस्य लक्षणत्वेतु त्वधिकरणविकल्पकतया विशेषणासार्थक्याभिप्रायेण तत्र साध्यादिभेदेन लक्षणाभेदद्वे

वन्हिमान्धूमादित्यादिस्थलीयलक्षणस्य पंचविधहेत्वाभाससाधारणतया संभवत्त्वात्तादृशलक्षणाक्रांतानां पंचविधत्वो
पसंगतिरित्यतस्त्वाह। पंचविधभेदोक्तिरितीयं च विधत्वोक्तिरित्यर्थः। तत्संभवस्थले तिपत्र्यपंचानामेव हेत्वाभासानां
संभवेऽपीरश्वो घटत्वादित्यादौ तत्तस्य लीयलक्षणाक्रांतस्य पंचविधत्वाभिप्रायेणेत्यर्थः नन्वेवं लक्षणानुगमा
दितरभेदानुमाने भागासिद्धिरित्यतस्त्वाह व्यभिचारादेरितिसाध्यादिभेदनियंत्रितत्वात् साध्यादिभेदनियंत्रितलक्ष
णावच्छेदककथाततथाच लक्षणस्यैवलक्ष्यत्वावच्छेदकस्याप्यननुगमात् न भागासिद्धिरिति भावः। नन्वेवमप्यनु
गतोक्त्यसंभवान्नायं प्रकारः साधीयानित्यतस्त्वाह शब्दाभेदस्येतिदुर्दं पुनरिहावधेयं तावदन्यान्यत्वमितरभेदानुमा
पकमेवन्तु दोषपदप्रवृत्तिनिमित्तं तथासति निर्वन्हित्वविशिष्टे वन्हेः साधने धूमोदुष्ट इत्यादौ दुष्टपदस्य चव न्यभावविशि
ष्टनिर्वन्हित्वावच्छिन्नान्यत्वमवर्यकतया निर्वन्हित्वविशिष्टेवन्हेः साधने धूमादेरनन्वितार्थकत्वप्रसंगात् त्वप्रसि
ध्यातस्य हेतुत्वेन्न्यथिनिर्वन्हित्वविशिष्टविशेष्यकवन्ह्यनुमितिप्रयोजकत्वासंभवात् किंतुत्वभावप्रयोजकत्वमात्मवृत्ति

ग॰प॰ ४० विषयिता निरूपका चमेवं तथा उक्तस्थले च प्रकारताप्रकारता निरूपितव्याप्तिप्रकारता निरूपितधूमत्वावच्छिन्नप्रकारता वोभय
मेव साधनपदार्थः प्रकारतारूपसाधनपदात् तदर्थस्य परसाधनपदार्थैकदेशव्याप्तिप्रकारता निरूपकप्रकारतायां च षष्ठ्यर्थस्तद्वह्नि
पदप्रतिपाद्यस्य वह्निनिष्ठत्वस्य स्वरूपसंबंधेन साधनपदार्थैकप्रकारतोद्भूये स्यसंभवतायां निर्वह्नित्वादि विशिष्टविशेष्यतापा
श्च निरूपितत्वसंबंधेनान्वयः साधनपदोत्तरसप्तम्या निरूपकत्वं द्वितीयार्थः निरूपकत्वे तु निरुक्तसाधनपदार्थयोः पृथगन्व
यः तद्वृत्तित निरूपकत्वे च द्वितीयान्वयः। द्वितीयान्वितत्यैतादृशनिरूपकत्वयोर्द्वयोर्दोषपदार्थवक्ष्यमाणेऽन्वयः तथा च निर्वह्नि
त्वविशिष्टविशेष्यता निरूपितवह्निनिष्ठप्रकारता निरूपकत्वस्य तादृशविशेष्यता निरूपिता या वह्निप्रकारता निरूपित
व्याप्तिप्रकारता निरूपित धूमत्वावच्छिन्नप्रकारतानिरूपकत्वस्य च द्वयोरभावः प्रयोजकः समानवृत्तिविषयता निरूपक
तानित्येवान्वयबोधः प्रतिबंधकीभूतज्ञानविषयिता निरूपकाभावे दीप्तत्वं बाद्य यपर्वतो वह्निसाधने धूमो दुष्ट इत्यादिवा राम॰
क्यप्रयोगवारणाय विषयितायां समानवृत्तित्वं निवेशितं दोषघटकके वलसाध्यादौ दोषव्यवहाराभावादत्रार्थे दोषइत्यादौ ४०

स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठतादृशी भयाभावाधिकरणताप्रयोजकाधिकरणतात्वव्यापकविरोधिविषय
ताप्रयोज्यताकधर्म एव दोषपदार्थ इति दिक् असाधारण्यं पक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वात्मकस्य स्य
सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानप्रतिबंधकत्वं निर्विवाद
मेवास्त्वेवं तदानदशायां हेतौ रनुमित्यजनकत्वात् बुद्धेः प्रतिबंधकत्वमात्रप्रयोजकमित्येतादृशाय याश्रुतार्थपरस्य दृशावि
शेषइत्यादि मूलस्यानुपपत्तिनिरन्वयासाधारण्यादिज्ञानप्रतिबंधकतायाश्च विषयस्यापि दितुमुचितत्वात् अत एव तादृ
शमूलमन्यथाख्यास्यातुमवतारयितुमाह पक्षादेरित्यादि इत्यत्रासाधारण्यानन्वयित्वीयासाधारणत्वपरूपदोषेदोषप
काके रहेतुविशेष्यकपक्षविषये सर्वसाध्यव्याप्यवत्त्वात्मके व्याप्तिरितितद्विषयकत्वस्यानिरुक्तानुमितिप्रतिबंध
कहेतुविषयकज्ञानसाधारणत्वात् अदृश्यप्रतिबंधकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं सर्वसाध्यवृत्त्या वृत्तत्वं न
दोषः। अपितु साधनवृत्तित्वविशिष्टतादृशाविशिष्टविषयकत्वं प्रतिबंधकतातिरिक्तवृत्तीत्यत आह यस्यैवेति। तत्रैव हेतौ

ग॰ध॰
४१

चसत्वात् अत्र वृत्तेः साध्यवन्निष्ठत्वे हेतोर्वृत्तेरिति भावः तथा च तादृशविशिष्टस्याप्रसिद्ध्या तस्य दोषत्वासंभवेन प्रसिद्धस्या
विशिष्टसाध्यवद्वृत्तित्वस्यैव तत्र दोषतायास्त्वाचेश्पकत्वादिति भावः अत्र द्रव्यत्वादावितिव्याप्तसमवेतद्रव्यत्वात् इ
त्यर्थः अत्र समवेतत्वस्य ध्वंससाधारणतया नित्यत्वव्याप्यत्वासंभवाद्विशेष्यांशनिवेशः अव्यवहितं तं व्याप्तिरित्य
नुपपत्तेस्तद्विषयकत्वस्य पक्षविषयकज्ञानसाधारणतया प्रतिबंधकतातिरिक्तवृत्तित्वादिति भावः ननु केवलान्वि
त्वव्याप्याद्रव्यद्रव्यत्वादिकं न तत्र दोषः अपि तु पक्षनिष्ठतद्वृत्तेवत्तादृशविशिष्टविषयकत्वं तु प्रतिबंधकतान
तिरिक्तवृत्त्येवेत्यत आह पक्षस्येति तथा च पक्षघटिततद्विशिष्टाप्रसिद्ध्या पक्षाघटितस्यैव दोषत्वमावश्यकमिति
भावः तयोस्तादृशस्यत्वीयपर्यो दोषत्वेनाभिमतयोर्धर्मयोः शब्दो नित्यः शब्दत्वात् उत्पादे शब्दत्वादिविशिष्यकति
तयाकृतत्वादिज्ञानविषये अयाप्याशंकानास्पदत्वाद्वलक्षणताभ्युपगमेन तत्परिहारस्य चान्यतोऽसंभवदुक्ति राम॰
कत्वात् हेतुपदं सद्धेतुपरतया व्याचष्टे हेत्वोरिति सद्धेत्वोः साध्यवद्वृत्तित्वरूपासाधारणपसाध्याभाववद्व्याप्यत्वस्य ४१

रूपकत्वरूपसत्प्रतिपक्षत्वासंभवात् असाधारणसत्प्रतिपक्षपदे अन्यहेतुं व्याचष्टे असाधारणादिति तथा प्रकृते सत्प्र
तिपक्षपदार्थः सद्धेत्वोर्दुष्टतारूपभावासत्त्वायोगादाभासपदं अन्यथा व्याचष्टे आभासत्वादिति तद्धेत्वोरित्यत्रत
द्रूपदस्य हेतुपरत्वं न संभवति सत्प्रतिपक्षस्थले प्रतिबंधकज्ञानस्य हेतुविषयकत्वानियमात् हेतुविषयकत्वक
थनस्याप्रयोजकत्वात् बुद्धिपदस्यापि बुद्धिसामान्यपरत्वं न संभवति हेत्वादिमात्रविषयकज्ञानस्याप्रतिबंधकत्वा
दतस्तत्पदस्य हेतुपक्षोभयपरतया बुद्धिपदस्य साध्यवद्वृत्तित्वसाध्याभावव्याप्यत्वावगाहिबुद्धिपरतया तत्प
तद्बुद्धिपदं हेतुविषयकसाध्यवद्वृत्तित्वरूपसाधारणपबुद्धिपक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिपरत्वेन व्या
चष्टे तद्बुद्धेरिति तयोरलक्ष्यतालाभाय हेत्वोरित्यनंतरं अलक्ष्यकरणयोग्यतीयस्तदर्थमंतर्भाव्य व्याचष्टे प्रतिबं
धकत्वं परमाप्यानीति पक्षे केवलं रूपकारणवच्छेदं स्पष्टयति तत्रविनितद्विषयस्य तादृशबुद्धिविषयत्वस्य दोषत्वे
दोषलक्षणलक्ष्यत्वं च सत्त्वात् लक्ष्यताप्रयोजकरूपस्यासत्त्वात् प्रतिबंधकीभूतज्ञानप्रमात्वस्यैव तद्विषयस्य

ग॰ बं॰
५२

लक्ष्यताप्रयोजकत्वादिति भावः असत्त्वात् विशिष्टस्याप्रसिद्धत्वादिति तन्नार्थः एकदेशस्य वाध्यभ्रमे शंकितत्तया विशिष्टप्रसि
द्धस्तद्दलक्ष्यतानिर्वाहकत्वविरहे रागानुपयोगादन्यथाप्रतिबंधकीभूतत्वभ्रमविषयस्यापि दोषत्वे वाधभ्रमे रागपक्षे साध्या
भावभ्रमेरणतस्य तद्विषयसाध्याभावादेः नचैवमुक्तस्थले प्राचां दृशा विशेषहेतोर्दुष्टत्वप्रवादो नोपपद्यत इष्टत्वात् प्राचि
पूनिकस्थिति। उपदर्शितस्थले यदि दशा विशेषहेतोर्दुष्टतासंगि कुर्वतस्तत्साधारण्याय तल्लक्षणमन्यथा व्याख्यानेन ते
षां मतसाहूज्ञानस्येति विष्टा अंतर्यस्यपरस्यदार्थेन्चयः। तथा च ज्ञानसंबंधित्वविशिष्टयद्रूपावच्छिन्नं यल्लिंगितं तत्संबंधे
नानुमितिप्रतिबंधकतावच्छेदकमित्यर्थः अत्रापि पूर्ववच्छेदकत्वमननिरिक्तवृत्तित्वं उक्तयुक्तेस्तत्पदमुभयत्र तद्रूपाव
च्छिन्नपरं लक्षणार्थः व्युत्क्रमेण लक्षणयोरर्थः न त्वेवमवतैनकथं दर्शितस्थलमतिपक्षादौ लक्षणसमन्वयः तत्र प्रतिबंध
कतावच्छेदकीभूतविशिष्टविषयकत्वस्याप्रसिद्धेः कथं वाध्यभिचारादिकमादाय सव्यभिचारादावेव लक्षणसमन्वयो व्यभि राम॰
चारादिविषयकत्वस्यैव प्रतिबंधकतावच्छेदकतया व्यभिचारादेस्तथात्वादित्यत आह। तन्नेति। तादृशप्रतिबंधकतावच्छे ५२

दकं चेत्यर्थः अमात्मकवाधप्रतिबंधकतामादायाव्याप्तिरावाः सूपद्वेतोर्दुष्टताया असंभवं स्पष्टीकर्तुमाह। वाधेति वाधज्ञान
निष्ठप्रतिबंधकतायाश्चेत्यर्थः अवच्छेदकइति शेषः पक्षस्यवांस्तत्वं साध्याभाववत्त्वेन विशते ननु वैज्ञानिकमिति सूच
यितुमिप्रतेति।। विषयस्यावच्छेदकत्वे युक्तिमाह तद्विषयकत्वेनेति तथा च विषयविषयकत्वस्य वविषयस्यापि विषयित
यान्यवच्छेदकत्वमक्षतमिति भावः।। विरोधिसामग्रीकालीनत्वादीति विरोधिकोटयनुमितिसामग्रीकालीनत्वेनप
रामर्शादेः प्रतिबंधकत्वमित्यभिमानः तथा च तदादाय वैवसत्प्रतिपक्षितेऽसाधारणे च सद्धेतौ शब्दविशेषे दुष्टत्वमि
ति भावः। ननु ज्ञाननिष्ठविरोधिसामग्रीकालीनत्वमादाय कथं हेतोर्दुष्टत्वं तस्य ज्ञानस्य वसत्वादित्याशंकां परिहरति
तद्घटकं चेति तद्विषयस्य हेत्वादेरपीति तत्कालनिरूपिताधेयतात्मकस्य तत्कालीनत्वस्याधेयभेदेन भेदानभ्युपगमा
दभ्युपगमे वाधेयतासंबंधेन तत्कालस्याप्यवच्छेदकतयाऽत्मादायैव लक्षणसमन्वयादिति भावः। नभेदेत्तेति विव
क्षितुं शक्यमिति शेषः साध्याभाववद्वृत्तित्वादिविशिष्टसाधनरूपदोषस्याभेदसंबंधेन हेतौ सत्त्वान्नैतादृशसंबंधेन तद

ग.भ. त्वविवक्षायामप्रसक्तिः बाधेनतदभावादित्युक्तिरन्त्याभाववद्ध्रदादिरूपपक्षावृत्तेर्धूमादिहेतौभेदासंभवादित्यर्थः तथाचतत्राव्याप्ति
४२ रितिभावः। अतएवबाधितेऽव्याप्तेराश्रयतयातद्वृत्तित्वविरहमितिशेषः धूमादेर्वन्ह्यभाववद्ध्रदाद्यनाश्रयत्वादेकदे
नविषयत्वादिरूपसंबंधस्यतावारत्वानिर्वाहकत्वादितिभावः अव्याप्तिमुक्त्वातिव्याप्तिमप्याहः वह्निर्व्यभिचारीति। न
नुसाध्याभाववद्वृत्तित्वादिरूपविषयस्यप्रतिबंधकतावच्छेदकोननुतत्तद्विशिष्टद्यत्वादिस्तदाश्रयोऽपिधूमादिरित्या
शंकांनिरस्करोति। साध्याभाववदिति। साध्याभाववद्वृत्तिहेतोर्ज्ञानस्येतितादृशहेतुविषयकज्ञानस्येत्यर्थः। तथाच
वन्ह्यभाववद्वृत्तिद्रव्यत्वादिकमपिविषयितावच्छेदकमेवेतिभावः ननुधूमादेस्तादृशधर्मवत्त्वेपिवह्नौसाध्येधूमो
दुष्टहेत्वादिव्यवहारस्यनापत्तिसंभवः उक्तयुक्त्यातद्धेतुकानुमितिविरोधिरूपवत्वस्यैवतत्रदुष्टताव्यवहारनियाम
कत्वादन्यथातत्प्रतीकारादिरूपतोऽन्यत्रातिप्रसंगमाहासाधारणादिविषयकस्यैवेतिज्ञाननिष्ठस्यज्ञानवृत्तित्व राम०
विशिष्टस्यसत्वादीतिस्तावान्वज्ञानादित्यादौज्ञानहेतुकसत्तोषानुमितिप्रतिबंधकतावच्छेदकेज्ञानांशेसत्ताद्यभावव ४२
द्वृत्तितावगाहित्वमारोपसत्वेसाध्येज्ञानंदुष्टमितिव्यवहारापत्तिरित्यर्थः। येनकेनापिसंबंधेनतद्वत्वविवक्षणीयमित्यपिदूषयतियथाक
थंचिदितिअतिप्रसक्तत्वादितिउक्तधर्ममादायसत्ताद्विसाध्यकेज्ञानेधूमाद्यंशेयद्वृत्त्यभाववद्वृत्तित्वात्

गादिविषयकज्ञानविषयत्वादिसंबंधेनतद्वत्वमादायवन्ह्यादिसाध्यकेधूमादावपिदुष्टव्यवहारापत्तेरित्यर्थः सत्प्रतिपक्षा
दिस्थलेविरोधिसामग्रीकालीनत्वेनप्रतिबंधकतामादायलक्षणसत्वमुपपादितंतद्दूषयतिविरोधिसामग्रीतिन
स्वसाध्यानुमितिप्रतिबंधकइतिनस्वजन्यानुमितिप्रतिबंधकइत्यर्थः। कारणत्वप्रतिबंधकत्वयोरेकत्रानभ्युपग
मादितिहृदयं विभिन्नरूपेणतदुभयस्यैकत्रोपगमेप्रतिबंदीस्तूचनायाहमणीतिनप्रतिबंधकत्वमनुपपत्तेतथाच
विरोधिकेऽप्यनुमितिसामग्रीकालीनत्वेनपरामर्शादीनामनुमितिप्रतिबंधकत्वेमणिसमवहितत्वेनवन्ह्यादीनाम
पिदाप्रतिबंधकत्वापत्तेः मणिसमवहितत्वापेक्षयालाघवान्मणित्वेनैवप्रतिबंधकताकल्प्यतइतिचेत्तर्हिवि
रोधिसामग्रीकालीनत्वापेक्षयालाघवात्तादृशसामग्रीत्वेनविरोधिपरामर्शत्वेनैववाप्रतिबंधकत्वंप्रकृतेकल्पयि
तुमुचितमितिकथंविरोधिसामग्रीकालीनत्वमादायलक्षणंसंगमनीयंतस्यप्रतिबंधकतातिरिक्तवृत्तित्वादितिभा
वः कार्यानुत्पत्तिव्याप्यतावच्छेदकत्वरूपप्रतिबंधकतावच्छेदकत्वमेवात्रविवक्षितं। ननुकारणीभूताभावप्रतियोगि

ग·ध· तावच्छेदकत्वस्य एतच्च विरोधिसामग्रीकालीनत्वेऽप्यक्षतमेव एतच्चाग्रे स्फुटीभविष्यतीत्यादिना यद्धर्मेति। यादृशधर्मविशि
४४ ष्टनिष्ठया व्यवहितोत्तरक्षणावच्छेदेन व्यापकीभूतोऽनुमित्यनुत्पादस्तादृशरूपमेवेत्यर्थः। निश्चये पक्षनिवेशाद्बाधादिवि
षयकसंशयसंस्काराद्यव्यवहितक्षणे कदाचिदनुमित्युत्पादेऽपि च न क्षतिः। अत्र पूर्वं तत्सरो प्रतिबंधकताव
च्छेदकमुक्तं प्रतिबंधकतावच्छेदकपदेन विवक्षितं भवतीति चेत् विरोधिकोट्यनुमितिसामग्र्याः प्रतिबंधकत्वकाव दु
नं प्रतिबंधकसमवहितोत्तरक्षणे कार्यानुत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिबंधक
तावच्छेदकतायामावश्यकत्वं प्रदर्शयति यत्र यावश्यमनुमित्यनुत्पादः। विरोधिसामग्र्याः प्रतिबंधकत्वे यदुक्तं ग
तदेव दोषं दूषयति तन्नैवमिति नहीत्यर्थः कालादीति घटितांतं हेतुगर्भविशेषणं तथा च कारणसमुदायः सामग्री साधक
विदं यत्प्रतिबंधिका कालादिसाधारणकारणानामपि तदंतर्निविष्टत्वात् तेषां च प्रतिबंधकतावच्छेदककोटिनि राम०
वेशस्य निष्फलत्वात् प्रतिबध्यकार्यं प्रति तेषामनुगुणत्वादित्यर्थः। सत्प्रतिपक्षस्थले विरोधिकोट्यनुमितिसाम ४४

ग्र्याः सत्त्वे कोट्यनुमितिप्रतिबंधकत्वमस्त्वंतासंभव उक्तिकमेव तत्र फलानुत्पादेन सामग्र्या एवासत्त्वादित्याह विशेष
तस्त्वित्यादिना अत्र सत्प्रतिपक्षस्थले सामग्री न प्रतिबंधिकेत्यनुषज्यते। तत्सत्त्वे सामग्रीसत्त्वे कार्योत्पादस्य ध्रुव
त्वात् सामग्र्याः कार्योत्पत्तिनियतत्वादिति भावः। ननु तर्हि तत्र परामर्शोद्देश्यानुमितिहेतुसत्त्वादनुमितिः कथं
नोत्पद्यत इत्यत आह किंत्विति विरोधिपरामर्शः साध्याभावव्याप्यवत्तानिश्चयः तथा चानुमितिप्रतिबंधकः अ
नुयत्र वह्न्यभावव्याप्यवत्तापरामर्शो वह्न्यभाववान् पक्ष इति बाधनिश्चयो वर्त्तते तत्र वह्निव्याप्यवत्ताज्ञानेन वह्न्य
नुमितिरनुत्पत्तेरित्यनुभवसिद्धं विरोधिपरामर्शमात्रस्य प्रतिबंधकत्वे च तत्रोपपद्यत इत्यत आह यद्वेति तत्सत्त्वे
पि विरोधिपरामर्शसत्त्वेऽपि तत्साध्यबाधवत्तारेतादृशपरामर्शानुमेयविरोधिकोटेः यत्रैव भावनिश्चयदशा
यां नानुमितिप्रतिबंधः न प्रकृतसाध्यानुमित्यनुत्पादः अप्रामाण्यग्रहाभावसमानकालीनत्वविशेष्यमित्यनुषज्य
ते तदभावस्याविरुद्धकोटिविरहनिश्चयाभावस्य तत्र विरोधिपरामर्शप्रतिबंधकतावच्छेदकगर्भनिवेशयतामिति

ग० ४०
४५

यत्रविपरीतकोटिव्याप्यवत्तापरामर्शदशायां तत्कोटिविरुद्धनिश्चयसत्त्वे तत्परामर्शाभावसमये ऽनंतरमेवानुमितिः स्वी
क्रियते नतु अन्यथेत्यभिमतस्य ह्यभाववैशिष्ट्यनिवेशेनैवोपपत्तौ तादृशबाधकग्रहाभाववैशिष्ट्यनिवेशो व्यर्थ इत्य
निर्भरसूचनम् यद्वा दिवे तु सूक्तं प्रमाभाराय ह्यभावस्य दृष्टांतविधया प्रतिबंधकतावच्छेदकत्वं च दर्शितं। नन्वस्तु अनुमि
तिविरोधिपरामर्शमात्रं प्रतिबंधकं तथापि तद्वृत्ति विरोधिसामग्रीकालीनस्य फलानुत्पादनियतत्वात्तादृश
सामग्रीकालीनत्वस्य निरुक्तप्रतिबंधकतावच्छेदकत्वं दुरपवादमेव एवं च तथाविधविरोधिपरामर्शकालीनत्व
मादाय सिद्धसाधारणे विशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यत्र विरोधिपरामर्शसमयादिकालीनत्वमा
दाय सद्धेतावतिप्रसंगमाह। यथा चेति तथा विधेति भ्रमप्रमासाधारणेत्यर्थः आद्योत्पत्त्यनंतरं नानुमितिरित्यनुपप
न्ने तथा च तादृशं बाधादिग्रहकालीनत्वमपि निरुक्तप्रतिबंधकतावच्छेदकावच्छिन्नं भवत्येवेति भावः अतिप्रसंग इति राम० ४५
बाधादेरनित्यदोषतया ऽकेनाप्यनभ्युपगमेनत्वापत्त्यनवकाशादिति भावः विरोधिपरामर्शादिकालीनत्वमा

दाय सर्वत्र सत्प्रतिपक्षिते ऽदुष्टत्वेनोपपादयितुं शक्यत इत्याह। न चेति न हीत्यर्थः अतीतादेरिति तथा चातीतादिसद्धेतौ
विरोधिपरामर्शदशायां भ्रमात्मसिद्धं सत्प्रतिपक्षितत्वं नोपपद्यत इति भावः सत्प्रतिपक्षिते सद्धेतौ विरोधिव्याप्य
वत्पक्षाप्रसिद्ध्यापि प्रतिबंधकीभूततद्भ्रमविषयप्रसिद्धविरोधिव्याप्यादिरेव दोष इति मतं दूषयति पदार्थेति पदार्थ द्वि
कत्वेनेति तृतीयार्थः स्वरूपसंबंधरूपमवच्छेदकत्वं न तु अन्यनतिरिक्तवृत्तित्वरूपं तथा सति विरोधिव्याप्यादेर्दोषत्वा
नुपपत्तेः प्रतिबंधकतायां ज्ञाननिष्ठत्वं विशेषणं काभिव्यक्ति ज्ञानादिनिष्ठप्रतिबंधकतावच्छेदकधर्मेऽतिप्रसं
गवारणाय न तु विरोधिकोटिव्याप्यत्वस्य पर्वते वह्निमान् धूमात् पर्वते न वह्निमान् जलत्वादित्यादौ प्रतिबंधकी
भूतज्ञानविषयसमवायादिसंबंधावच्छिन्नपक्षधर्मतायाः प्रकृते हेतावभावात् कथं तस्य दुष्टत्वमत आह तद्वत्व
मपीति विरोधिव्याप्यादिमत्त्वमपीत्यर्थः तद्रूपेति स्वविषयकज्ञानविषयत्वेत्यर्थः सर्वं अविशेषस्यादि
क्षितत्वादिति भावः तादृशसंबंधस्य प्रकृतहेतावनुपपाद्यतया तस्येति विरोधिव्याप्यादिज्ञानस्येत्यर्थः। सम्बंधेऽत्र लंब

ग.बा.
४६

त्वयोगि। न चैवं क्रमिकपरामर्शद्वयस्थले सत्प्रतिपक्षत्वानुपपत्तिरिति वाच्यं तत्रापि तादृशव्याप्यादिप्रकारकमहत्त
हेतुविषयकईश्वरज्ञानादिकमादायतद्दूत्वोपपत्तेः साध्याभाववत्पक्षविषयकत्वेन साध्याभावप्रकारेरापक्षा
वगाहित्वेन साध्याभाववत्पक्षत्वेनेति साध्याभावप्रकारकपक्षज्ञानांशेप्रमात्वविषयकत्वेनेत्यर्थः मतभेदेन
विकल्पः तस्य तादृशज्ञानस्य प्रतिबन्धकत्वे इति। साध्यावत्त्वपि पक्षे साध्यवत्त्वेपि सतिपक्षस्य साध्यवत्त्वे सत्य
रीतिया व त्वयर्वतो वन्हिमान्धूमादित्यादौ भ्रमात्मकबाधादिज्ञाननिष्ठप्रतिबंधकतावच्छेदकविषयतानिरू
पकवन्ह्यभावादेः स्वविषयकं ज्ञानविषयत्वादिसंबंधेन वैशिष्ट्यस्य हेतौ सत्वादिति भावः। इदमुपलक्षणं
वन्हिमान्धूमादित्यादौ विरोधिपरामर्शकाले यत्तद्विषयविरोधिव्याप्याद्धिकमादायापि हेतोर्दुष्टत्वप्रसंगो वो
ध्यः तत्रापि पक्षांशे तद्विशिष्टविशेषणतावच्छेदकसमूहालंबनज्ञानसंबंधेन हेतौ तद्वैशिष्ट्यसंभवात्। अन्यथाति राम०
रिक्तवृत्तित्वरूपमवच्छेदकत्वं विवक्षणीयमित्यभिप्रायेण वा बाधभ्रमप्रतिबंधकतामादायाति प्रसंगस्योद्धार ४६

मापांकत्वे विशिष्टेति। साध्याभावविशिष्टपक्षविषयकत्वमेव प्रतिबंधकतानतिरिक्तवृत्तिनतु साध्याभावविष
यकत्वमात्रमित्यर्थः विशिष्टं च साध्याभावविशिष्टपक्षः तत्र बाधस्य मेसत्प्रतिपक्षस्थले सर्वत्र तादृशविशि
ष्टप्रसिद्धमेवेत्यभिमानः भ्रमेण निरोक्तरीत्या तत्कि भिमितिपक्षवृत्तिसाध्यकसत्प्रतिपक्षे साध्याभावस्यापि विशि
ष्टपक्षस्यप्रसिद्धत्वात्। सर्वत्रेति सत्प्रतिपक्षे सत्प्रतिपक्षतया भवन्मते सिद्धप्रसिद्ध इति तथा चानतिरिक्तवृ
त्तित्वरूपावच्छेदकत्वं विवक्षितुमशक्यमिति दर्शितानि त्या प्रसिद्धेवर्विरहेति भावः। तद्धत्वस्य क संबंधावच्छिन्नकी वि
दृष्ययतिपक्षाकथंचिदिति। व्याप्तिप्रसक्तं सद्धेतु साधारणं न यौच पर्वतादेः वन्ह्यादिमत्वे साध्ये धूमादौ दुष्टता
व्यवहारापत्तिरिति भावः। तादृशसंबंधेन तद्धत्वस्य धूमादिरूपसद्धेतु साधारणं त्वं स्फुटयति। पक्षमादेरिति सा
न्नरूपेण स्वविषयकज्ञानविषयत्वेन तदा प्रत्ययत्वादिना स्वदेनिष्ठैककालीनत्वपरिग्रहः व्यभिचारादिसत्वात् त
न्नन्यभावत्वद्वैतित्वादिसत्वात्। ननु यादृशसंबंधावच्छिन्नपक्षत्वप्रकारतानिरूपित धर्मिविशेष्यतास्मालित्वेन

ग०वि० ४८ ज्ञानस्य प्रतिबंधकत्वं तेन संबंधेन तद्वत्त्वमेव दुष्टत्वमिति वाच्यं। एवं च स्वरूपादिसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वा
दिप्रकारतानिरूपितहेतुविशेष्यताशालित्वेनैव व्यभिचारादिज्ञानस्य प्रतिबंधकतया तेन संबंधेन तद्वत्त्वस्य च हे
तोरभावात्तत्रातिव्याप्तिरित्याशंकां निराकुरुते यादृशेति। सर्वत्र सत्प्रतिपक्षित इति ह्रदो वह्निमान्धूमवत्वादि
त्यादिस्थले धूमवद्रादिरूपहेतोर्व्याप्यताघटकसंबंधेन वन्ह्याद्यभावव्याप्यवत्तायाः असत्त्वादिति भावः। ह्रदो
वन्हिमान्धूमादित्यादौ धूमादिरूपहेतोर्व्याप्यताघटकसमवायादिसंबंधेन वन्ह्याद्यभावव्याप्यधूमवत्त्वादेः
सत्त्वात्सर्वत्रेत्युक्तं क्वचित्सद्धेतौ विति सद्धेतुतादृशाश्रयस्यैव क्वचिदित्यर्थः। पर्वतो वह्निमान्धूमादित्यादौ विरो
धिपरामर्शसमवधानदशायामपि प्रतिबंधकतावच्छेदकप्रकारताश्रयवन्ह्याद्यभाववद्वन्हिमद्ध्रदत्वव्याप्यादेस्ता
दृशप्रकारतावच्छेदकस्वरूपादिसंबंधेन धूमादिवृत्तित्वादिति भावः। यत्तु ज्ञानसंबंधेन तद्वत्त्वमेव दुष्टत्वं ज्ञानं च राम० ४७
विशिष्टव्यवहाराद्यनुरोधात्। क्वचिदेव कदाचिदेव कस्यचित्संबंधः एवं च विरोधिव्याप्यादेर्ज्ञानं विरोधिपरामर्शद

शायामेव प्रकृतहेतौ तत्संबंधस्तदैव तत्र दुष्टताव्यवहारात्साध्याभावादेर्ज्ञानं तु तत्र न कदाचिदपि तथा परमेश्व
रादिसाधारणं साध्याभावविशिष्टपक्षादेर्ज्ञानं तु तत्र सर्वदैवेति तत्तु हास्यास्पदमेव सकलाभियुक्तपुरुषसाधा
रणस्यानियतव्यवहारस्यासिद्धत्वात्सर्वासेना विशेषवत्तां तादृशव्यवहारस्य विपरीतस्यापि संभवात्ज्ञानस्यानि
यतसंबंधत्वात्साधकत्वादिति वाधसत्प्रतिपक्षज्ञानयोः प्रत्यक्षशाब्दज्ञानप्रतिबंधकत्वमभिधाय वाधसत्प्रति
पक्षयोर्लिंगज्ञानाजन्यज्ञानमात्रवृत्तिधर्मावच्छिन्नप्रयोज्यतानिरूपितप्रयोजकताश्रयाभावप्रतियोगिज्ञान
विषयत्वं लिंगतासाधारणदोषत्वं निरस्यं भवतीत्याक्षि संमयिाकृतादृशप्रतिबंधकतायां च युक्तिं नौकेतिन्मूलताप
रिहाराय तत्र युक्तिमाह स्यादेतदित्यभावेस्येति स्यादेतच्च प्रत्यक्षशाब्दयोरिति समानधर्मितावच्छेदकस्य स्यादेत्च
प्रकारकस्य लौकिकसंनिकर्षाद्यजन्यप्रत्यक्षस्य शाब्दस्य चेत्यर्थः। एवं शाब्दबुद्धौ वा यत्तदभावव्याप्यवत्ताज्ञानयोः
प्रतिबंधकत्वेन नरशिरःकपालमिति नरशिरःकपालं शुचित्वानुमापकेन तद्बुद्धिर्मिकप्राशयांगत्वपरामर्शेन स्वतः

ग०ष० फलत्वद्वारागमतत्प्रामाण्यविशेषविरोधः स्यादित्यर्थः सचानुभवविरुद्धः तत्र प्रामाण्यग्रहज्ञानात् दृशायामपि शाब्दधीचक्षु
४८ नस्यानुभवसिद्धत्वादिति भावः सामान्यतेति तत्रेति। तादृशाधीचक्षुर्ज्ञानप्राक्कालइत्यर्थः स्वहेतुजनकाभावेन व्याप्ति
निश्चयस्यैवत्वतरागमविरोधेनानुमितेस्त्वानुत्पत्तेरितियोऽज्ञानाएवं वास्तवव्याप्यधर्मस्य येन केनापि रूपेण
ज्ञानमेव तद्विरोधिस्त्रयितुं व्याप्यत्वरूपेण श्रुत्वचप्रामाण्यगत्वस्य ज्ञानेपि व्यभिचाराहकतर्कविरहे व्यभिचारशंक
यांशौ व्याप्यत्वेन तत्ज्ञानं न संभवति कारणांतरविरहेण यत्र व्यभिचारविरहः तत्र कथंचित्व्यभिचारहेयिगृही
त्प्रामाण्यकागमत्वेऽपूर्वविषयविपरीतविषयकत्वेन ततऊप्रामाण्यं गृह्यते तथा च तादृशप्रामाण्यगत्वज्ञा
नतशौचानुमितिज्ञाने शब्दाशौचज्ञानप्रतिबंधेवाप्रभवतीति समुदायार्थः आगमेप्रामाण्यग्रहस्य विरह
यरिग्रहादिनैव भवति यावता तादृशपरामर्शेन प्रामाण्यं गृह्यते तावत् अभवत्येवागमप्रवृत्तिरिति भावः यद्वेत्या रा०म०
द्विग्रंथेन बाधादिज्ञानस्यानुमितिज्ञानाप्रतिबंधकत्वं व्यवस्थाप्य बाधादेर्लिंगासाधारण्यदोषत्वमेवोपपा ४८

दितं तत्र संगच्छते वा धितार्थस्य शब्दात्स्फुरणमेऽनुमितेरप्यनवबाधात् तत्राप्यप्रामाण्यग्राहकतया बाधादि
हेस्यप्रवृत्त्यादिविरोधितोपपत्तेरित्यत्रैकल्पेग्रंथकृतोऽनिर्भरं स्थाह॥ यद्वेत्यादीति॥ ननु आनुमानिकबाधादि
निश्चयदशायामपि लौकिकसन्निकर्षादितः प्रत्यक्षनिश्चयोत्पत्त्या बाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबंधक
त्वं न संभवतीत्यनुमित्यसाधारणप्रतिबंधकत्वं बाधनिश्चयत्वावच्छिन्नस्यास्तु अतो यद्विषयकनिश्चयत्वेनानु
मित्यसाधारणप्रतिबंधकत्वं तत्त्वस्यलक्षणताप्रयोजकत्वाभिप्रायेण यद्वेत्यादिग्रंथस्य वस्तुलक्ष्यतोपपादक
त्वं सुसंगच्छत इत्यत आह प्रत्यक्षमातीति समानेंद्रियजन्यबाधनिश्चयसत्त्वे लौकिकप्रत्यक्षस्यानुत्पत्तेरानुमा
निकेतिबाधनिश्चयविशेषणांशं ग्रंथं प्रतीतिनियाच तावतैवलिंगासाधारणदोषत्वं बाध्यत इति भावः तत्रापितद्
प्रतिबंधकत्वमाशंकते योग्यतेति श्रन्यथासिद्धत्वादिति बाधादिनिश्चयदशायां योग्यताज्ञानरूपकारणविरहेणै
वशाब्दज्ञानुत्पादादिति भावः तदभावः बाधादिनिश्चयाभावः तत्र शाब्दबुद्धौ यथायोग्यतासंशयपद्धतीयद्धे

262

रोऽसमरणाद्यात्मकयोग्यतानिश्चयेऽस्तित्विति यद्धर्षेणाशात्वज्ञानवारणाय तदभावस्यशक्तवोधहेतुत्वस्यावश्यकत्वं
तथापि वाधादिज्ञानस्य शक्तिप्रतिबंधकत्वे यदि निर्विवादोपनीतभानविशेष्यप्रतिबंधकतायैव वाधादेर्लिंगसाधा
रणदोषत्वनिराकरणात्वसंभवात्तत्रैतन्निराकरोति एवमपीति। उपनीतमानविशेषदोषविशेषाज्जन्योपनीतभा
नं तत्वेनवाधनिश्चयाद्यभावत्वेनैव दुर्वारत्वादिति वाधादिनिश्चयदशायामनुमितेरिवतादृशोपनीतभानानुत्पा
दस्य सर्वानुभवसिद्धत्वादिति भावः॥ सव्यभिचारसामान्यलक्षणमनुमणिकृतस्तद्विभज्य नमाक्षिपति पक्षपी
तित्व